**याँऽ उ च न प्रविद्म। त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञꣳ सुकृतं जुषस्व ॥ ॐ अद्य** *अमुक* **गोत्रः अस्मत्पितामह** *अमुकः* **रुद्र स्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा** (तीसरी अंजलि दें) ॥

**ॐ मधु वाताऽ ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥ ॐ अद्य** *अमुक* **गोत्रः अस्मत्प्रपितामह** *अमुकः* **आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा** (परदादा को पहली अंजलि दें)। **ॐ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता ॥ ॐ अद्य** *अमुक* **गोत्रः अस्मत्प्रपितामह** *अमुकः* **आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा** (दूसरी अंजलि दें)॥ **ॐ मधुमान्नो वनस्पतिर्मधुमाँऽ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥ ॐ अद्य** *अमुक* **गोत्रः अस्मत्प्रपितामहः** *अमुकः* **आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा** (तीसरी अंजलि दें) ॥

नीचे लिखे वाक्य बोल कर एक-एक अंजलि दें।

**ॐ तृप्यध्वम्। ॐ तृप्यध्वम्। ॐ तृप्यध्वम्।**

माता, दादी और परदादी को तीन-तीन अंजलियां दें।

**ॐ अद्य अमुक गोत्राऽस्मन्माता** *अमुकी* **देवी गायत्रीस्वरूपिणी तृप्यतामिदं तिलोदकं तस्यै स्वधा ३ ॥** (माता)

**ॐ अद्य अमुक गोत्राऽस्मत्पितामही** *अमुकी* **देवी सावित्री-स्वरूपिणी तृप्यतामिदं तिलोदकं तस्यै स्वधा ३ ॥** (दादी)

**ॐ अद्य अमुक गोत्राऽस्मत्प्रपितामही** *अमुकी* **देवी सरस्वती-स्वरूपिणी तृप्यतामिदं तिलोदकं तस्यै स्वधा ३ ॥** (परदादी)

**ॐ अद्य अस्मत्सापत्नमाता अमुक गोत्रा** *अमुकी* **देवी गायत्री-स्वरूपिणी तृप्यतामिदं तिलोदकं तस्यै स्वधा ३ ॥**(सौतेलीमाता)

नीचे लिखा मन्त्र प्रत्येक बार बोलकर नाना को तीन अंजलियाँ दें।

**ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो द्वेष्मैतद्वः पितरो वासऽ आधत्त ॥ ॐ अद्य** *अमुक*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**गोत्रोऽस्मन्मातामहः** *अमुकः* **अग्निस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा ३ ।।** (नाना)

आगे लिखा मन्त्र प्रत्येक बार बोलकर परनाना को तीन अंजलियां दें।

**ॐ नमो वः पितरो० ।। ॐ अद्य** *अमुक* **गोत्रोऽस्मत्प्रमातामहः** *अमुकः* **वरुणस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा३।।** (परनाना)

नीचे लिखा मन्त्र प्रत्येक बार बोलकर वृद्धपरनाना को तीन अंजलियां दें।

**ॐ नमो वः पितरो० ।। ॐ अद्य** *अमुक* **गोत्रोऽस्मद्वृद्ध-प्रमातामहः** *अमुकः* **प्रजापतिस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा३।।** (वृद्ध परनाना)

नानी, परनानी और वृद्धपरनानी को तीन-तीन अंजलि दें।

**ॐ अद्य** *अमुक* **गोत्राऽस्मन्मातामही** *अमुकी* **देवी गङ्गारूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा ३ ।।** (नानी)

**ॐ अद्य** *अमुक* **गोत्राऽस्मत्प्रमातामही** *अमुकी* **देवी यमुनारूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा ३ ।।** (परनानी)

**ॐ अद्य** *अमुक* **गोत्राऽस्मद्वृद्धप्रमातामही** *अमुकी* **देवी सरस्वतीरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा ३ ।।** (वृद्ध परनानी)

नीचे लिखे स्वर्गीय संबन्धियों का गोत्र, संबन्ध तथा नाम उच्चारण कर प्रत्येक को तीन-तीन अंजलि दें। गुरु, दादा, परदादा, ताऊ, चाचा, भाई, पुत्र, श्वसुर, मामा और फूफा आदि तथा उन लोगों की पत्नियां, अपनी पत्नी, बहन और पुत्री आदि को अंजलियां दें। पश्चात् पूर्वाभिमुख हो जनेऊ और अंगोछे को बाएँ कन्धे पर रखकर देवतीर्थ से नीचे लिखे मन्त्र से जलधारा छोड़ें।

**ॐ देवाऽसुरास्तथा यक्षा-नागा-गन्धर्व-राक्षसाः।**
**पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ।।**
**जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः।**
**तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ।।**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



दक्षिणाभिमुख हो, जनेऊ एवम् अंगोछे को दाहिने कन्धे पर रखकर पितृतीर्थ से नीचे लिखे मन्त्रों को पढ़कर जलधारा छोड़ें।

**नरकेषु समस्तेषु यातनासु च ये स्थिताः।**
**तेषामाप्यायनायैतद्दीयते सलिलं मया ।।**
**येऽबान्धवा बान्धवाश्च येऽन्यजन्मनि बान्धवाः।**
**ते तृप्तिमखिला यान्तु यश्चास्मत्तोऽभिवाञ्छति ।।**
**ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः।**
**तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकम् ।।**
**आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः।**
**तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।।**
**अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्।**
**आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ।।**

अंगोछे की चार तह कर, उसमें तिल तथा जल छोड़ कर नीचे लिखे मन्त्र से जल के बाहर बाईं ओर पृथ्वी पर निचोड़ें।

**ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः।**
**ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ।।**

हाथ में बंटी हुई जो कुशाएँ हैं, उन्हे खोलकर त्याग दें किन्तु पवित्री न त्यागें। पश्चात् नीचे लिखे मन्त्र से भीष्मपितामह को एक अंजलि दें।

**भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः।**
**आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ।।**

पूर्वाभिमुख तथा सव्य हो, आचमन करें तथा नीचे लिखे प्रत्येक नाम से एक-एक अंजलि दें।

**ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ रुद्राय नमः। ॐ सूर्याय नमः। ॐ दिग्भ्यो नमः। ॐ दिग्देवताभ्यो नमः। ॐ अग्नये नमः। ॐ पृथिव्यै नमः। ॐ ओषधिभ्यो नमः। ॐ वाचे नमः। ॐ वाचस्पतये नमः। ॐ मित्राय नमः। ॐ महद्भ्यो नमः। ॐ अद्भ्यो नमः। ॐ अपाम्पतये नमः। ॐ वरुणाय नमः।।**

नीचे लिखे मन्त्र से सूर्य को अर्घ दें, पश्चात् जल को नेत्रों पर लगाएँ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
जगत्सवित्रे शुचये नमस्ते कर्मदायिने ॥
ॐ देवागातु विदोगातुं वित्त्वा गातुमित।
मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥
*कृतेनानेन तर्पणेन पितृरूपी जनार्दनः प्रीयताम्।*

क्षमाप्रार्थना प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

## ब्रह्म-यज्ञ

मण्डल-ब्राह्मण तथा उपनिषद् आदि श्रुतियों का पाठ करें या नीचे लिखा पाठ करें।

"अनुवाकम्"– ॐ विभ्राड् बृहत्पिबतु सोम्यम्मध्वायुर्दधद्यज्ञ-पतावविहुतम्। वातजूतो योऽ अभिरक्षतित्मना प्रजाः पुपोष पुरुधा विराजति ॥ "पुरुषसूक्तम्"– ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। सभूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ "शिवसङ्कल्पः"– ॐ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति। दूरङ्गमं ज्योतिषां ज्योतिरेकन्तन्मे मनः शिवसङ्कल्प-मस्तु॥ "मण्डलब्राह्मणम्"– ॐ यदेतन्मण्डलं तपति तन्महदुक्थन्ताऽ ऋचः सऽ ऋचां लोकोऽथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि समानि स साम्नां लोकोऽथ यऽ एषऽ एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूꣳषि स यजुषां लोकः। "यजुर्वेदः"– ॐ इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽ इन्द्राय भागं प्रजावतीरनमीवाऽ अयक्ष्मा मा व स्तेनऽ ईशत माघशꣳ सो ध्रुवाऽ अस्मिन् गोपतौ स्यात् वह्वीर्यजमानस्य पशून् पाहि ॥ "ऋग्वेदः"– ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ॥ "सामवेदः"– ॐ अग्नऽ आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि ॥ "अथर्ववेदः"– ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शं योरभि स्त्रवन्तु नः ॥
अनेन ब्रह्मयज्ञाख्येन कर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



# नित्य-होम

तिल से आधे चावल, चावलों से आधे जौ, जौं से आधी चीनी, और यथेष्ट घृत तथा मेवा मिलाकर साकल्य बनाएँ। संकल्पवाक्य के अन्त में **श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं नित्यहोमं करिष्ये** कहें। वेदी पर पञ्चभू संस्कार करें। १. कुशाओं से वेदी साफ कर उन्हें ईशानकोण में फेंकें। २. गोबर और जल लेपन करें। ३. स्रुवा के मूल से पूर्व की ओर उत्तरोत्तर प्रादेशमात्र की तीन लकीरें खीचें। ४. अनामिका और अंगूठे से उन लकीरों में से किंचित् मिट्टी निकालें। ५. वेदी पर जल छिड़कें। ६. अग्निकोण से अग्नि लाकर नीचे लिखे मन्त्र से नैर्ऋत्यकोण में किंचित् अग्नि छोड़ें।

### विनियोग

**ॐ क्रव्यादमग्निमिति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवताऽग्निसंस्कारे विनियोगः।**

### मन्त्र

**ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदो देवेभ्यो हव्यं वहतु प्रजानन् ॥**

विनियोग : **ॐ अयन्ते योनिरिति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता अग्निस्थापने विनियोगः ॥**

मन्त्र : **ॐ अयन्ते योनिर्ऋत्वियो यतो जातोऽ अरोचथाः। तञ्जानन्नग्नऽ आरोहाथा नो बर्द्धया रयिम् ॥**

नीचे लिखे मन्त्र से वेदी के पूर्व में उत्तराग्र कुशा रखें।

**ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ॥**

नीचे लिखे मन्त्र से वेदी के दक्षिण में पूर्वाग्र कुशा रखें।

**ॐ इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमध्न्याऽ इन्द्राय भागम्प्रजावती रनमीवाऽ अयक्षमा मावस्तेनऽ ईशतमाघशꣳ सो ध्रुवाऽ अस्मिन् गोपतौ स्यात् वह्वीर्यजमानस्य पशून् पाहि ॥**

नीचे लिखे मन्त्र से वेदी के पश्चिम में उत्तराग्र कुशा रखें।

**ॐ अग्नऽ आयाहि वीतये गृहाणो हव्यदातये। निहोता सत्सि बर्हिषि ॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



नीचे लिखे मन्त्र से वेदी के उत्तर में पूर्वाग्र कुशा रखें।

**ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शं योरभिस्त्रवन्तु नः ॥**

अग्नि प्रज्वलित कर नीचे लिखे मन्त्र से अग्नि का ध्यान करें।

**ॐ चत्वारि शृङ्गाः त्रयोऽ अस्य पादा द्वे शीर्षे सप्त हस्ता सोऽ अस्य। त्रिधा बद्धो बृषभो रोरवीति महो देवो मर्त्याँऽ२ आविवेश ॥**

**मुखं यः सर्वदेवानां हव्यभुक् कव्यभुक् तथा।**
**पितृणां च नमस्तुभ्यं विष्णवे पावकात्मने ॥**

प्रार्थना : **ॐ अग्ने शाण्डिल्यगोत्र मेषध्वज ! मम सम्मुखो भव ॥**

**ॐ पावकाग्नये नमः** इस मन्त्र से अग्नि का पूजन करें और कनिष्ठा को अलग रखते हुए सीधे हाथ से आहुति दें।

**ॐ भूः स्वाहा। इदमग्नये न मम १ ॥ ॐ भुवः स्वाहा। इदं वायवे न मम २ ॥ ॐ स्वः स्वाहा। इदं सूर्याय न मम ३ ॥ ॐ अग्नये स्वाहा। इदमग्नये न मम ४ ॥ ॐ धन्वन्तरये स्वाहा। इदं धन्वन्तरये न मम ५ ॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा। इदं विश्वेभ्यो देवेभ्यो न मम ६ ॥ ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम ७ ॥ ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम ८ ॥ ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा। इदमग्नये न मम ९ ॥ ॐ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। इदमग्नये न मम १० ॥ ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा। इदमग्नये न मम ११ ॥ ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। इदमग्नये न मम १२ ॥ ॐ एनसऽ एनसोऽवयजनमसि स्वाहा। इदमग्नये न मम १३ ॥ ॐ यच्चाहमेनो विद्वाँश्चकार यच्चाविद्वाँस्तस्य सर्वस्यैनसोऽवयजनमसि स्वाहा। इदमग्नये न मम १४ ॥**

प्रार्थना : **ॐ सप्त तेऽ अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि। सप्त होत्रः सप्तधा त्वा जयन्ति सप्त योनिरापृणस्व घृतेन स्वाहा। इदमग्नये न मम १५ ॥ अनेन होमेन श्रीपरमेश्वरः प्रीयतां न मम। ॐ तत्सद् ब्रह्मार्पणमस्तु ॥**

स्रुवा से भस्म ले 'भस्म-धारण मन्त्र से' लगाएं, वेदी की कुशाओं को अग्नि में डालें।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



# देवपूजा-विधि

पूजन-सामग्री को शुद्ध करके यथास्थान रखकर विधिपूर्वक पूजन करें।

**नाङ्गुष्ठैर्मर्दयेद्देवं नाधःपुष्पैः समर्चयेत्। कुशाग्रैर्न क्षिपेत्तोयं वज्रपातसमं भवेत् ॥**

देवताओं को अंगूठे से न मलें और पुष्प अधोमुख करके न चढ़ाएँ तथा कुशा के अग्रभाग से देवताओं पर जल न छिड़कें। ऐसा करना वज्रपात के तुल्य है (आचार मयूख)।

**त्रिर्देवेभ्यः प्रक्षालयेत् सकृत् पितृभ्यः ॥**

देवताओं को तीन बार और पितरों को एक बार धो कर अक्षत चढ़ाएँ (आपस्तम्ब)।

**नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम्। न दूर्वया यजेद् दुर्गां विल्वपत्रैश्च भास्करम् ॥**
**दिवाकरं वृन्तहीनैर्विल्वपत्रैः समर्चयेत् ॥**

विष्णु को चावल, गणेश को तुलसी, दुर्गा को दूर्वा, और सूर्यनारायण को विल्वपत्र न चढ़ाएँ। किन्तु डंडी तोड़ कर विल्वपत्र सूर्यनारायण को चढ़ा सकते हैं।

**अधोवस्त्रधृतं चैव जलेऽन्तःक्षालितं च यत्। देवतास्तत्र गृह्णन्ति पुष्पं निर्माल्यतां गतम् ॥**

धोती में रखा हुआ और जल में डुबोया हुआ पुष्प निर्माल्य हो जाता है। इसलिये देवता उसे ग्रहण नही करते (आह्निक)।

**शिवे विवर्जयेत् कुन्दमुन्मत्तं च तथा हरौ। देवीनामर्कमन्दारौ सूर्यस्य तगरं तथा ॥**

शिव को कुन्द, विष्णु को धतूरा, देवी को आक तथा मदार और सूर्य को तगर का पुष्प न चढ़ाएँ।

**तुलसी-मंजरीभिर्यः कुर्यात् हरिहरार्चनम्। न स गर्भगृहं याति मुक्तिभागी न संशयः ॥**

तुलसी की मंजरी से जो विष्णु भगवान् तथा शिव की पूजा करता है उसको गर्भ में वास नही करना पड़ता। वह अवश्य मुक्ति पाता है।

**पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम्। यथोत्पन्नं तथा देयं विल्वपत्रमधोमुखम् ॥**

पत्र, पुष्प तथा फल का मुख नीचे करके न चढ़ाएँ। वे जैसे उत्पन्न होते हैं उन्हे वैसे ही चढ़ाना चाहिये। किन्तु विल्वपत्र उलटा करके चढ़ाएँ (आह्निक)।

**पर्णमूले भवेद् व्याधिः पर्णाग्रे पापसम्भवः। जीर्णपत्रं हरत्यायुः शिरा बुद्धिविनाशिनी ॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



पान की डंडी से व्याधि और अग्रभाग से पाप होता है। सड़ा पान आयु और शिरा बुद्धि को नष्ट करती है। इसलिये डंडी, अग्रभाग और शिरा निकाल दें (आचारार्क)।

### वृक्ष से तुलसीग्रहण-मन्त्र

**तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया।**
**केशवार्थे चिनोमि त्वां वरदा भव शोभने! ॥**

संक्रान्ति, द्वादशी, अमावस्या, पूर्णिमा, रविवार और सन्ध्या के समय तुलसी तोड़ना निषिद्ध है। यदि विशेष आवश्यकता हो तो नीचे लिखे मन्त्र से तोड़ सकते हैं।

**त्वदङ्गसम्भवेन त्वां पूजयामि यथा हरिम्।**
**तथा नाशय विघ्नं मे ततो यान्ति परां गतिम् ॥**

पूर्वाभिमुख बैठकर बाईं ओर घंटा, धूप तथा दाहिनी ओर शंख, जलपात्र तथा पूजन की सामग्री रख, आचमन, प्राणायाम करके संकल्पवाक्य के अन्त में **शालग्रामपूजनं तदङ्गत्वेन गणपत्यादि-देवानां मण्डले स्थापनं पूजनं च करिष्ये** कहकर जलादि छोड़ें।

### दीपक-पूजन

तैल का दीपक अपनी बाईं तथा धृत का दाहिनी ओर पूर्व या उत्तर मुख करके चावल आदि पर रख प्रज्वलित कर हाथ धो, नीचे लिखी प्रार्थना करें।

**भो दीप! देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्।**
**यावत्कर्मसमाप्तिः स्यात् तावत् त्वं सुस्थिरो भव ॥**

### घण्टा-पूजन

आवाहन के लिये घंटा बजा कर पश्चात् घंटे का पूजन करें।

**आगमार्थन्तु देवानां गमनार्थन्तु राक्षसाम्। घण्टा-नादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत् ॥**

### शंख-पूजन

शंख में जल भरकर शंखमुद्रा दिखा पूजाकर आगे लिखी प्रार्थना करें।

**त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।**
**निर्मितः सर्वदेवैश्च पाञ्चजन्य! नमोऽस्तुते ॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



## स्वस्तिवाचन

ॐ श्रीमन्महागणाधिपतये नमः। लक्ष्मीनारायणाभ्यां नमः। उमामहेश्वराभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः। शचीपुरन्दराभ्यां नमः। मातापितृचरणकमलेभ्यो नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः। एतत्कर्मप्रधानदेवताभ्यो नमः। अविघ्नमस्तु ॥ ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ॐ पयः पृथिव्यां पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्॥ ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि। वैष्णवमसि विष्णवेत्वा ॥ ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ ॐ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽ अवसा गमन्निह ॥ ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ॐ शतमिन्नु शरदोऽ अन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो मध्या रीरिषतायुर्गन्तोः ॥ ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवाऽ अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥ ॐ यतो यतः समीहसे ततो नोऽ अभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ ॐ विश्वानि देव सवितुर्दुरितानि परासुव। यद् भद्रं तन्नऽ आसुव ॥ ॐ एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वे देवासऽ इह मादयन्तामोम्ऽ३ प्रतिष्ठ ॥ एष वै

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



प्रतिष्ठा नाम यज्ञो यत्रै तेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति ॥ ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥

## पुण्याहवाचन

*तत्रादौ युग्मब्राह्मणानां हस्तेषु।* (यजमानः) शिवा आपः सन्तु। (ब्राह्मणाः) सन्तु शिवा आपः। *इति जलम् ॥* (यजमानः) सुगन्धाः पान्तु। (ब्राह्मणाः) सौमङ्गल्यं चास्तु। *इति गन्धम् ॥* (यजमानः) सौमनस्यमस्तु। (ब्राह्मणाः) अस्तु सौमनस्यम्। *इति पुष्पम् ॥* (यजमानः) अक्षतं चारिष्टं चास्तु। (ब्राह्मणाः) अस्त्वक्षतमरिष्टं च। *इत्यक्षतान् ॥* (यजमानः) सफलताम्बूलानि पान्तु। (ब्राह्मणाः) ऐश्वर्यमस्तु। *इति सफलताम्बूलम् ॥* (यजमानः) दक्षिणाः पान्तु। (ब्राह्मणाः) बहुदेयं चास्तु। *इति दक्षिणा ॥* (यजमानः) ॐ स्वर्चितमस्तु। (ब्राह्मणाः) अस्त्वर्चितं मङ्गलं च। *इति जलम् ॥* दीर्घायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो बहुपुत्रं बहुधनं चास्तु। यं कृत्वा सर्ववेदयज्ञक्रियारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग्यजुः सामाथर्वणाशीर्वचनं वह्रृषिसमनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। वाच्यताम् (इति ब्राह्मणवचनम्) (पुनः यजमानो ब्रूयात्) व्रतजपनियमतपस्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् ॥ (ब्राह्मणाः) समाहितमनसः स्म। (यजमानो ब्रूयात्) प्रसीदन्तु भवन्तः॥ (ब्राह्मणाः) प्रसन्नाः स्म ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*ततो यजमानः अवनीकृतजानुमण्डलः कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना जलपूर्णं (सुवर्णयुक्तं) कलशं धारयित्वा भूमौ स्थापिते पात्रद्वये प्रथमपात्रे किंचिदुदकं पातयेत्।*

(ततः ब्राह्मणाः वदेयुः) ॐ शान्तिररस्तु। पुष्टिररस्तु। वृद्धिररस्तु। ऋद्धिररस्तु। अविघ्नमरस्तु। आयुष्यमरस्तु। आरोग्यमरस्तु। शिवमरस्तु। शिवं कर्मास्तु। कर्मसमृद्धिररस्तु। पुत्रसमृद्धिररस्तु। वेदसमृद्धिररस्तु। शास्त्रसमृद्धिररस्तु। धनधान्यसमृद्धिररस्तु। इष्टसम्पदरस्तु। अरिष्टनिरसनमरस्तु। यच्छ्रेयस्तदरस्तु। *ततो द्वितीय पात्रे पातयेत्।* यत्पापमकल्याणं तद्दूरे प्रतिहतमस्तु। *पुनः प्रथमपात्रे पातयेत्।* उत्तरोत्तरे कर्मण्यविघ्नमरस्तु। उत्तरोत्तरमहरहरभिवृद्धिररस्तु। उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् ॥ तिथिकरणमुहूर्त-नक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम्। तिथिकरणे सुमुहूर्ते सुनक्षत्रे सुग्रहे सुदैवते प्रीयेताम्। अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्। इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम्। माहेश्वरीपुरोगा मातरः प्रीयन्ताम्। वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम्। अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम्। ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम्। विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम्। ऋषयश्छन्दाँस्याचार्याः वेदाः देवाः यज्ञाश्च प्रीयन्ताम्। ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्। अम्बिकासरस्वत्यौ प्रीयेताम्। श्रद्धामेधे प्रीयेताम्। दुर्गापाञ्चाल्यौ प्रीयेताम्। भगवती कात्यायनी प्रीयताम्। भगवती माहेश्वरी प्रीयताम्। भगवती ऋद्धिकरी प्रीयताम्। भगवती वृद्धिकरी प्रीयताम्। भगवती पुष्टिकरी प्रीयताम्। भगवती तुष्टिकरी प्रीयताम्। भगवन्तौ विघ्नविनायकौ प्रीयेताम्। सर्वाः कुलदेवताः प्रीयन्ताम्। *पुनः द्वितीयपात्रे पातयेत्।* हताश्च ब्रह्मद्विषः। हताश्च परिपन्थिनः। हताश्च विघ्नकर्तारः। शत्रवः पराभवं यान्तु। शाम्यन्तु घोराणि। शाम्यन्तु पापानि। शाम्यन्त्वीतयः। *पुनः प्रथमपात्रे पातयेत्।* शुभानि वर्द्धन्ताम्। शिवा आपः सन्तु। शिवा ऋतवः सन्तु। शिवा अग्नयः सन्तु। शिवा आहुतयः सन्तु। शिवा वनस्पतयः सन्तु। शिवा अतिथयः सन्तु। अहोरात्रे शिवे स्याताम्। निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम्। योगक्षेमो नः कल्पताम्। शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमादित्यरूपाः

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



सर्वे ग्रहाः प्रीयन्ताम्। भगवान्नारायणः प्रीयताम्। भगवान् पर्जन्यः प्रीयताम्। भगवान् स्वामी महासेनः प्रीयताम्। पुरोनुवाक्यया यत्पुण्यं तदस्तु। याज्यया यत्पुण्यं तदस्तु। वषट्कारे यत्पुण्यं तदस्तु। प्रातः सूर्योदये यत्पुण्यं तदस्तु ॥

*ततो यजमानः सुवर्णकलशं भूमौ निधाय प्रथमपात्रपातितजलेन शिरः सम्मृज्य सपरिवारगृहांश्चाभिषेचयेत्। द्वितीयपात्रजलमेकान्ते पातयेत्।*

(यजमानो ब्रूयात्) ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं पुण्यं तत्पुण्याहं ब्रुवन्तु नः ॥ भो ब्राह्मणाः! मम सपरिवारस्य गृहे पुण्याहं भवन्तो ब्रुवन्तु ॥ (ब्राह्मणाः) ॐ पुण्याहम् ३। ॐ पुनन्तु मा देवजनः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ (यजमानः) पृथिव्यामुद्धृतायान्तु यत् कल्याणं पुराकृतम्। ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥ भो ब्राह्मणाः! मम सपरिवारस्य गृहे कल्याणं भवन्तो ब्रुवन्तु। (ब्राह्मणाः) ॐ कल्याणम् ३। ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्याꣳ शूद्राय चार्य्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुपमादो नमतु ॥ (यजमानः) सागरस्य च या लक्ष्मीर्महालक्ष्म्यादिभिः कृता। सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः ॥ भो ब्राह्मणाः! मम सपरिवारस्य गृहे ऋद्धिं भवन्तो ब्रुवन्तु। (ब्राह्मणाः) ॐ ऋद्ध्यताम् ३। ॐ सत्रस्यऽ ऋद्धिरस्यगन्म ज्योतिरमृताऽ अभूम। दिवं पृथिव्याऽ अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ (यजमानः) स्वस्त्यस्तु ह्यविनाशाख्या नित्यं मङ्गलदायिनि। विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥ भो ब्राह्मणाः! मम सपरिवारस्य गृहे स्वस्तिं भवन्तो ब्रुवन्तु ॥ (ब्राह्मणाः) ॐ स्वस्ति ३। ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ (यजमानः) समुद्रमथनाज्जाता जगदानन्द कारिका। हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥ भो ब्राह्मणाः! मम सपरिवारस्य गृहे श्रीरस्त्विति भवन्तो ब्रुवन्तु। (ब्राह्मणाः) ॐ अस्तु श्रीः ३। ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहो रात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मऽ इषाण सर्व

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**लोकं मऽ इषाण ॥** *ततस्तिलकाशीर्वादः। अथ दक्षिणा दानम्।* **ॐ अद्य पुण्याहवाचनसांगतासिद्ध्यर्थं पुण्याहवाचकेभ्यो नानानामगोत्रेभ्यो ब्राह्मणेभ्य इमां यथाशक्ति हिरण्यमूल्यद्रव्यदक्षिणां सम्प्रददे ॥**

**॥ इति पुण्याहवाचनम् ॥**

**अंगन्यास** (पूरे मन्त्र शालग्राम पूजन में लिखे हैं)

**ॐ सहस्रशीर्षा॰**—*वामकरे।* **ॐ पुरुषऽ एवेदꣳ सर्वम्॰**—*दक्षिणकरे।* **ॐ एतावानस्य महिमा॰**—*वामपादे।* **ॐ त्रिपादूर्ध्व॰**—*दक्षिणपादे।* **ॐ ततो विराडजायत॰**—*वामजानुनि।* **ॐ तस्माद्यज्ञात्॰**—*दक्षिणजानुनि।* **ॐ तस्माद्यज्ञात्सर्वहुतऽ ऋचः॰**—*वामकट्याम्।* **ॐ तस्मादश्वा॰**—*दक्षिणकट्याम्।* **ॐ तं यज्ञम्॰**—*नाभौ।* **ॐ यत्पुरुषं व्यदधुः॰**—*हृदि।* **ॐ ब्राह्मणोऽस्य॰**—*कण्ठे।* **ॐ चन्द्रमा मनसो॰**—*वामबाहौ।* **ॐ नाभ्याऽ आसीत्॰**—*दक्षिणबाहौ।* **ॐ यत्पुरुषेण॰**—*मुखे।* **ॐ सप्तास्या॰**—*अक्ष्णोः।* **ॐ यज्ञेन यज्ञम्॰**—*मूर्ध्नि ॥*

**पञ्चांगन्यास**

**ॐ अद्भ्यः सम्भृतः॰**—*हृदये।* **ॐ वेदाहमेतम्॰**—*शिरसि।* **ॐ प्रजापतिश्च॰**—*शिखायाम्।* **ॐ यो देवेभ्यऽ आतपति॰**—*कवचाय हुम्।* **ॐ रुचं ब्राह्मम्॰**—*अस्त्राय फट् ॥*

**करन्यास**

**ॐ ब्राह्मणोऽस्य॰**—*अङ्गुष्ठाभ्यां नमः।* **ॐ चन्द्रमा॰**—*तर्जनीभ्यां नमः।* **ॐ नाभ्याऽ आसीत्॰**—*मध्यमाभ्यां नमः।* **ॐ यत्पुरुषेण॰**—*अनामिकाभ्यां नमः।* **ॐ सप्तास्यासन्॰**—*कनिष्ठिकाभ्यां नमः।* **ॐ यज्ञेन यज्ञम्॰**—*करतलकर-पृष्ठाभ्यां नमः ॥*

## गणपति तथा अम्बिका-पूजन

सुपारी पर मौली लपेट कर चावलों कर स्थापित पर नीचे लिखा ध्यान करके आवाहनं मन्त्र से अक्षत छोड़ें। मूर्ति हो तो पुष्प छोड़ें।

**गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्।**
**उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ॥**
**ॐ अम्बेऽ अम्बिकेऽम्बालिके न मा नयति कश्चन।**
**ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*आवाहन* आगच्छ भगवन् देव ! स्थाने चात्र स्थिरो भव।
यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव ।।
*श्रीगणेशाम्बिकाभ्यां नमः, आवाहयामि।*

*प्रतिष्ठा* अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।
*श्रीगणेशाम्बिकाभ्यां नमः, प्रतिष्ठापयामि।*

*आसन* रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम्।
आसनं च मया दत्तं गृहाण परमेश्वर ।।
*श्रीगणेशाम्बिकाभ्यां नमः, आसनं समर्पयामि।*

*पाद्य* उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम्।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ।।
*श्रीगणेशाम्बिकाभ्यां नमः, पाद्यं समर्पयामि।*

*अर्घ्य* अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह।
करुणां कुरु मे देव ! गृहाणार्घ्यं नमोऽस्तुते ।।
*श्रीगणेशाम्बिकाभ्यां नमः, अर्घ्यं समर्पयामि।*

*आचमन* सर्वतीर्थसमायुक्तं सुगन्धि निर्मलं जलम्।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ।।
*श्रीगणेशाम्बिकाभ्यां नमः, आचमनीयं जलं समः।*

*स्नान* गङ्गा - सरस्वती - रेवा - पयोष्णी - नर्मदाजलैः।
स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे ।।
*श्रीगणेशाम्बिकाभ्यां नमः, स्नानं समर्पयामि।*

*दुग्धस्नान* कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ।।
*श्रीगणेशाम्बिकाभ्यां नमः, पयस्नानं समर्पयामि।*

*दधिस्नान* पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ।।
*श्रीगणेशाम्बिकाभ्यां नमः, दधिस्नानं समर्पयामि।*

*घृतस्नान* नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।
*श्रीगणेशाम्बिकाभ्यां नमः, घृतस्नानं समर्पयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*मधुस्नान* तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, मधुस्नानं समर्पयामि।*

*शर्करास्नान* इक्षुसारसमुद्भूता शर्करापुष्टिकारिका।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, शर्करास्नानं समर्पयामि।*

*पञ्चामृत* पयोदधिघृतं चैव मधु च शर्करायुतम्।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, पञ्चामृतस्नानं समर्पयामि।*

*शुद्धोदक* मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम्।
तदिदं कल्पितं देव ! स्नानार्थं प्रतिगृह्यताम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, शुद्धोदकस्नानं समर्पयामि।*

*वस्त्र* सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, वस्त्रं समर्पयामि।*

*उपवस्त्र* ॐ सुजातो ज्योतिषा सह शर्म वरूथमा सदत्सवः।
वासोऽ अग्ने विश्वरूपꣳ सं व्ययस्व विभावसो ॥
*श्रीगणेशाम्बिकाभ्यां नमः, उपवस्त्रं समर्पयामि।*

*यज्ञोपवीत* नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं मयादत्तं गृहाण परमेश्वर ॥
*श्रीगणेशाम्बिकाभ्यां नमः, यज्ञोपवीतं समर्पयामि।*

*मधुपर्क* कांस्ये कांस्येन पिहितो दधिमध्वाज्यसंयुतः।
मधुपर्को मयानीतः पूजार्थं प्रतिगृह्यताम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, मधुपर्कं समर्पयामि।*

*गन्ध* श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, गन्धं समर्पयामि।*

*रक्तचन्दन* रक्तचन्दनसम्मिश्रं पारिजातसमुद्भवम्।
मया दत्तं गृहाणाशु चन्दनं गन्धसंयुतम् ॥
*श्रीगणेशाम्बिकाभ्यां नमः, रक्तचन्दनं समर्पयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*रोली* **कुङ्कुमं कामनादिव्यं कामनाकामसम्भवम्।**
**कुंकुमेनार्चितो देव गृहाण परमेश्वर ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, कुंकुमं समर्पयामि।*

*सिन्दूर* **सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्द्धनम्।**
**शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, सिन्दूरं समर्पयामि।*

*अक्षत* **अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः।**
**मया निवेदिता भक्त्या गृहाण परमेश्वर ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, अक्षतं समर्पयामि।*

*पुष्प* **पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः।**
**पूजार्थं नीयते तुभ्यं पुष्पाणि प्रतिगृह्यताम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, पुष्पं समर्पयामि।*

*माला* **माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।**
**मयानीतानि पुष्पाणि गृहाण परमेश्वर ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, पुष्पमाल्यां समर्पयामि।*

*बिल्वपत्र* **त्रिशाखैर्विल्वपत्रैश्च अछिद्रैः कोमलैः शुभैः।**
**तव पूजां करिष्यामि गृहाण परमेश्वर ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, विल्वपत्रं समर्पयामि।*

*दूर्वा* **त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरैरपि।**
**सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, दूर्वां समर्पयामि।*

*दूर्वांकुर* **दूर्वांकुरान् सुहरितानमृतान् मङ्गलप्रदान्।**
**आनीतांस्तव पूजार्थं गृहाण गणनायक ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, दूर्वांकुरान् समर्पयामि।*

*शमीपत्र* **शमी शमय मे पापं शमी लोहितकण्टका।**
**धारण्यर्जुनबाणानां रामस्य प्रियवादिनी ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, शमीपत्रं समर्पयामि।*

*आभूषण* **अलङ्कारान् महादिव्यान्नानारत्नविनिर्मितान्।**
**गृहाण देवदेवेश! प्रसीद परमेश्वर! ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, आभूषणं समर्पयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*अबीरगुलाल* **अबीरं च गुलालं च चोवा चन्दनमेव च।**
**अबीरेणार्चितो देव! अतः शान्तिं प्रयच्छ मे ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, अबीरं समर्पयामि।*

*सुगन्धतैल* **चम्पकाशोकवकुल - मालती - मोगरादिभिः।**
**वासितं स्निग्धताहेतुं तैलं चारु प्रगृह्यताम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, सुगन्धिततैलं समर्पयामि।*

*धूप* **वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।**
**आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, धूपं आघ्रापयामि।*

*दीप* **आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।**
**दीपं गृहाण देवेश ! त्रैलोक्यमितिरापहम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, दीपं दर्शयामि।*

*नैवेद्य* **शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम्।**
**उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, नैवेद्यं निवेदयामि।*

*पानीयजल* **अतितृप्तिकरं तोयं सुगन्धिं च पिबेच्छया।**
**त्वयि तृप्ते जगत्तृप्तं नित्यतृप्ते महात्मनि ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, मध्येपानीयं जलं समर्पयामि।*

*ऋतुफल* **नारिकेलफलं जम्बूफलं नारङ्गमुत्तमम्।**
**कूष्माण्डं पुरतो भक्त्या कल्पितं प्रतिगृह्यताम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, ऋतुफलं समर्पयामि।*

*आचमन* **गङ्गाजलं समानीतं सुवर्णकलशे स्थितम्।**
**आचम्यतां सुरश्रेष्ठ ! शुद्धमाचमनीयकम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, आचमनं समर्पयामि।*

*अ॰ऋतुफल* **इदं फलं मया देव स्थापितं पुरतस्तव।**
**तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, अखण्डऋतुफलं समर्पयामि।*

*ताम्बूलपू॰ फ॰* **पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।**
**एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।**
*श्रीगणेशाम्बिकाभ्यां नमः, ताम्बूलं पूगीफलं च समर्पया॰।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*दक्षिणा* **हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।**
**अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥**
*श्रीगणेशाम्बिकाभ्यां नमः, द्रव्यदक्षिणां समर्पयामि।*

*आरती* **चन्द्रादित्यौ च धरणी विद्युदग्नि तथैव च।**
**त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥**
*श्रीगणेशाम्बिकाभ्यां नमः, आरार्तिक्यं समर्पयामि।*

*पुष्पांजलि* **नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।**
**पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर ! ॥**
*श्रीगणेशाम्बिकाभ्यां नमः, पुष्पांजलिं समर्पयामि।*

*प्रार्थना* **रक्ष रक्ष गणाध्यक्ष ! रक्ष त्रैलोक्यरक्षक।**
**भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥**
*अनया पूजया गणेशाम्बिकें प्रीयेतां न मम।*

## कलश-पूजन

अष्टदल-कमल बना, धान्य रख उसपर कलश-स्थापना करें।

*भूमिस्पर्श* **ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीन्दृꣳ ह पृथिवीम्मा हिꣳ सीः॥**

*धान्य* **ॐ धान्यमसि धिनुहि देवान् प्राणायत्वोदानायत्वा व्यानायत्वा। दीर्घामनुप्रसितिमायुषेधान्देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वामहीनाम्पयोऽसि ॥**

*सप्तधान्य पर कलश स्थापन* **ॐ आ जिघ्र कलशं मह्या त्वाविशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥**

*कलश में जल* **ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽ ऋतसदन्यसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद ॥**

(निम्न सभी वस्तुएँ कलश में छोड़ें)

*गन्ध* **ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥** *गन्धं समर्पयामि।*

*सर्वौषधि* **ॐ याऽ ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**बभ्रुणा महꣳ शतन्धामानि सप्त च ॥** *सर्वौ. समर्प० ।*

*दूर्वा* **ॐ काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि। एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥** *दूर्वां समर्पयामि ।*

*पञ्चपल्लव* **ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृतः। गोभाजऽ इत्किलासथ यत्सनवथ पूरुषम् ॥** *पञ्चपल्लवं समर्पयामि ।*

*सप्तमृत्तिका* **ॐ स्योना पृथिविनो भवानृक्षरा निवेशनी। यच्छा नः शर्म्म सप्रथा ॥** *सप्तमृत्तिकां समर्पयामि ।*

*पूगीफल* **ॐ याः फलिनीर्याऽ अफलाऽ अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳ हसः ॥** *पूगीफलं समर्प० ।*

*पञ्चरत्न* **ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे ॥** *पञ्चरत्नानि समर्पयामि ।*

*सुवर्ण या द्रव्य* **ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्यजातः पतिरेकऽ आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषाविधेम ॥** *द्रव्यं समर्पयामि ।*

*वस्त्र* **ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥** *वस्त्रं समर्पयामि ।*

*पूर्णपात्र* **ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहाऽ इषमूर्जꣳ शतक्रतो ॥** *पूर्णपात्रं समर्पयामि ।*

(पूर्णपात्र कलश पर रखें)

*श्रीफल* **ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽ इषाण सर्वलोकं मऽ इषाणं ॥** *श्रीफलं समर्पयामि ।*

(नारियल पर लाल वस्त्र लपेट कर पूर्णपात्र पर रखें)

*वरुणावाहन* **ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह वोध्युरुशꣳ स मा नऽ आयुः प्र मोषीः ॥** *अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि। ॐ भूर्भुवः स्वः भो वरुण ! इहागच्छ, इह तिष्ठ, स्थापयामि, पूजयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*आवाहन* सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ।।
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।।

*प्रतिष्ठा* ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वे देवा सऽ इह मादयन्तामोऽ३म् प्रतिष्ठ।। *कलशे वरुणाद्यावाहिता देवताः सुप्रतिष्ठिता वरदा भवन्तु।।* पूजन कर नीचे लिखी प्रार्थना करें।

देवदानवसंवादे मध्यमाने महोदधौ।
उत्पन्नोऽसि यदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्राः विश्वेदेवाः सपैत्रिकाः।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।।

*प्रसन्नो भव! वरदो भव! अनया पूजया श्रीवरुणाद्या देवताः प्रीयन्तां न मम।* अक्षत छोड़ें।

## नवग्रह-पूजन

बाएँ हाथ में अक्षत ले दाहिने हाथ से प्रत्येक मन्त्र के बाद छोड़ें।

**सूर्य** – मण्डल के मध्य में (गोलाकार, लाल)

**ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।**
**हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।**

*ॐ भूर्भुवः स्वः सूर्य! इहागच्छ, इह तिष्ठ। सूर्याय नमः।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**चन्द्र** – अग्निकोण में (अर्धचन्द्र, श्वेत)

**ॐ इमन्देवाऽ असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्येष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽ एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥**

*ॐ भूर्भुवः स्वः चन्द्र ! इहागच्छ, इह तिष्ठ। चन्द्राय नमः।*

**मंगल** – दक्षिण में (त्रिकोण, लाल)

**ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽ अयम्। अपाꣳ रेताꣳ सि जिन्वति ॥** *ॐ भूर्भुवः स्वः भौम ! इहागच्छ, इह तिष्ठ। भौमाय नमः।*

**बुध** – ईशानकोण में (बाण, हरा)

**ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयं च। अस्मिन्त्सधस्थेऽ अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥**

*ॐ भूर्भुवः स्वः बुध ! इहागच्छ, इह तिष्ठ। बुधाय नमः।*

**बृहस्पति** – उत्तर में (अष्टदल, पीला)

**ॐ बृहस्पतेऽ अति यदर्योऽ अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवसऽ ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥**

*ॐ भूर्भुवः स्वः बृहस्पते ! इहागच्छ, इह तिष्ठ। बृहस्पतये नमः।*

**शुक्र** – पूर्व में (पञ्चकोण, श्वेत)

**ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिवत्क्षत्रम्पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**

*ॐ भूर्भुवः स्वः शुक्र ! इहागच्छ, इह तिष्ठ। शुक्राय नमः।*

**शनि** – पश्चिम में (मनुष्य, काला)

**ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शं योरभि स्त्रवन्तु नः ॥**

*ॐ भूर्भुवः स्वः शनैश्चर ! इहागच्छ, इह तिष्ठ। शनैश्चराय नमः।*

**राहु** – नैर्ऋत्यकोण में (मकर, काला)

**ॐकयानश्चित्रऽ आभुव दूती सदावृधः सखा। कया शचिष्ठया वृता॥**

*ॐ भूर्भुवः स्वः राहो ! इहागच्छ, इह तिष्ठ। राहवे नमः।*

**केतु** – वायव्यकोण में (काली ध्वजा)

**ॐ केतुं कृण्वन्नकेतवे पेशो मर्याऽ अपेशसे समुषद्भिरजायथाः ॥**

*ॐ भूर्भुवः स्वः केतो ! इहागच्छ, इह तिष्ठ। केतवे नमः।*

**ॐ सूर्यादि नवग्रहेभ्यो नमः ॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh


पूजन कर आगे लिखी प्रार्थना करें।

**ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।**
**गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥**

*अनया पूजया सूर्यादि नवग्रहाः प्रीयन्तां न मम ॥* अक्षत छोड़ें।

## पञ्चलोकपाल-पूजन

बाएँ हाथ में अक्षत ले दाएँ हाथ से प्रत्येक मन्त्र के बाद छोड़ें।

*गणपति*–**ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसोमम। आहमजानिगर्भधमा त्वमजासि गर्भधम् ॥**

*ॐ भूर्भुवः स्वः गणपते ! इहागच्छ, इह तिष्ठ। गणपतये नमः।*

*देवि*–**ॐ जातवेदसे सुनवाम सोममाराती यतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥**

*ॐ भूर्भुवः स्वः दुर्गे ! इहागच्छ, इह तिष्ठ। दुर्गायै नमः।*

*वायु*–**ॐ आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्त्रिणीभिरूप याहियज्ञम्। वायोऽ अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदानः ॥** *ॐ भूर्भुवः स्वः वायो ! इहागच्छ, इहतिष्ठ। वायवे नमः।*

*आकाश*–**ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥**

*ॐ भूर्भुवः स्वः ! आकाश इहागच्छ, इह तिष्ठ। आकाशाय नमः।*

*अश्विनी*–**ॐ या वां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षताम्। उपयाम गृहीतोऽस्यश्विभ्यान्त्वैषते योनिर्माध्वीभ्यां त्वा ॥** *ॐ भूर्भुवः स्वरश्विना ! इहागच्छ, इह तिष्ठ। अश्विनीभ्यां नमः।* (इत्यावाह्य) **ॐ गणपत्यादिपञ्चलोकपालेभ्यो नमः** से पूजन करें पश्चात् **अनया पूजया पञ्चलोकपालाः प्रीयन्तां न मम** बोलकर अक्षत छोड़ें।

## दशदिक्पाल-पूजन

बाएँ हाथ में अक्षत ले दाहिने हाथ से प्रत्येक मन्त्र के बाद छोड़ें।

**इन्द्र** (पूर्व में) **ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh


**शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः ॥** *इन्द्राय नमः। इन्द्रं आवाहयामि, स्थापयामि।*

*अग्नि* (अग्निकोण में) **ॐ अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे। देवाँऽ आसादयान्विह ॥** *अग्नये नमः। अग्निं आवाहयामि, स्थापयामि।*

*यम* (दक्षिण में) **ॐ असि यमोऽ अस्यादित्योऽ अर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्तऽ आहुस्ते त्रीणि दिवि बन्धनानि ॥** *यमाय नमः। यमं आवाहयामि, स्थापयामि।*

*निर्ऋति* (नैर्ऋत्यकोण में) **ॐ असुन्वन्तमयजमानमिच्छ स्तेन स्येत्या मन्विहि तस्करस्य। अन्यमस्मदिच्छसातऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥** *निर्ऋतये नमः। निर्ऋतिं आवा०, स्थाप०।*

*वरुण* (पश्चिम में) **ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचक्रे ॥** *वरुणाय नमः। वरुणं आवाह., स्थापयामि।*

*वायु* (उत्तरकोण में) **ॐ वायुरग्रेगा यज्ञप्रीः साकं गन्मनसायज्ञम्। शिवो नियुद्भिः शिवामि ॥** *वायवे नमः। वायुं आवाह०, स्थाप०।*

*कुबेर* (उत्तर में) **ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय। इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमऽ उक्तिं यजन्ति॥** *कुबेराय नमः। कुबेरं आवाहयामि, स्थापयामि।*

*ईशान* (ईशानकोण में) **ॐ तमीशानं जगतस्तस्थुषस्पतिं धियन्जिन्वमवसे हूमहे वयम्। पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये।** *ईशानाय नमः। ईशानं आवाह०, स्थाप०।*

*ब्रह्मा* (ईशान-पूर्व के मध्य में) **ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽ आवः। स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥** *ब्रह्मणे नमः। ब्रह्माणं आवाह०, स्थाप.।*

*अनन्त* (नैर्ऋत्य-पश्चिम के मध्य में) **ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। येऽ अन्तरिक्षः तेभ्यो सर्पेभ्यो नमः ॥**

*अनन्ताय नमः। अनन्तं आवाहयामि, स्थापयामि।*

**ॐ इन्द्रादिदशदिक्पालेभ्यो नमः** से पूजन करें, पश्चात् **अनया पूजया दशदिक्पालदेवताः प्रीयन्तां न मम** कहकर अक्षत छोड़ें।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



### षोडशमात्रिका-पूजन

बाएँ हाथ में अक्षत लेकर दाहिने हाथ से प्रत्येक नाम पर छोड़ें।

**गौरी पद्मा शची मेधा सावित्री विजया जया।**
**देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।**
**हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः।**
**गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश ।।**

*ॐ भूर्भुवः स्वः षोडशमातृकाभ्यो नमः। इहागच्छत, इह तिष्ठत।* ॐ **गौर्यादिषोडशमातृकाभ्यो नमः** पूजन कर, नीचे लिखी प्रार्थना करें।

**जयन्ती मङ्गलाकाली भद्रकाली कपालिनी।**
**दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ।।**

**अनया पूजया गौर्यादिषोडशमातरः प्रीयन्तां न मम** बोलकर अक्षतद्व छोड़ें।

### चतुःषष्टियोगिनी पूजन

बाएँ हाथ में अक्षत लेकर दाहिने हाथ से नीचे लिखे मन्त्र से छोड़ें।

**आवाहयाम्यहं देवीः योगिनीः परमेश्वरीः।**
**योगाभ्यासेन सन्तुष्टाः परध्यानसमन्विताः।**
**चतुःषष्टिः समाख्याता योगिन्यो हि वरप्रदाः ।।**

*ॐ चतुःषष्टियोगिनीमातृकाभ्यो नमः। इहागच्छत, इह तिष्ठत ।।*

पूजन कर, नीचे लिखे वाक्य से अक्षत छोड़ें ।

**अनया पूजया चतुःषष्टियोगिन्यः प्रीयन्तां न मम ।।**

### रक्षा-विधान

बाएँ हाथ में पीली सरसों अथवा चावल, द्रव्य और तीन तार की मौली लेकर दाहिने हाथ से ढक कर नीचे लिखे मन्त्र बोलें।

**गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम्।**
**विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ।।**
**स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम्।**
**धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ।।**
**दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम्।**
**राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ।।**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



शक्राद्या देवताः सर्वाः मुनींश्चैव तपोधनान्।
गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ।।
वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम्।
व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदम् ।।
विद्याधिका ये मुनयः आचार्याश्च तपोधनाः।
तान् सर्वान् प्रणमाम्येवं यज्ञरक्षाकरान् सदा ।।

आगे लिखे मन्त्रों से दसों दिशाओं में पीली सरसों या चावल छोड़ें।

पूर्वे रक्षतु वाराहः आग्नेय्यां गरुडध्वजः।
दक्षिणे पद्मनाभस्तु नैर्ऋत्यां मधुसूदनः ।।
पश्चिमे चैव गोविन्दो वायव्यां तु जनार्दनः।
उत्तरे श्रीपती रक्षेत् ऐशान्यां तु महेश्वरः ।।
ऊर्ध्वं रक्षतु धाता वो ह्यधोऽनन्तश्च रक्षतु।
एवं दश दिशो रक्षेद् वासुदेवो जनार्दनः ।।
रक्षाहीनन्तु यत्स्थानं रक्षत्वीशो ममाद्रिधृक्।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ।।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु।
अपक्रामन्तु ते भूता ये भूता भूतले स्थिताः ।।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।।
सर्वेषामविरोधेन पूजाकर्म समारभे ।।

पश्चात् मौली गणेशजी के सम्मुख रख दें। फिर उस मौली को गणपत्यादि समस्त देवताओं पर चढ़ा कर रक्षाबन्धन करें।

ब्राह्मण के हाथ में दक्षिणा दे कर रक्षा बांधें पश्चात् तिलक करें।

### ब्राह्मण-रक्षाबन्धन-मन्त्र

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्।
दक्षिणा-श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ।।

### ब्राह्मण-तिलक-मन्त्र

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



आगे लिखे मन्त्रों से यजमान को रक्षा बाँधकर तिलक करें।

**यजमान-रक्षाबन्धन-मन्त्र**

**येन बद्धो बली राजा दानवेन्द्रो महाबलः।**
**तेन त्वामनुबध्नामि रक्षे मा चल मा चल ॥**

**यजमान-तिलक-मन्त्र**

**ॐ शतमानं भवति शतायुर्वै पुरुषः।**
**शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन् धत्ते ॥**

## शालग्राम-पूजन

शालग्राम तथा प्रतिष्ठित मूर्तियों में आवाहन न करें, केवल पुष्प छोड़ें।

आवाहन **ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥** *आवाहयामि।*

आसन **ॐ पुरुषऽ एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥** *आचमनं समर्पयामि।*

पाद्य **ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वाभूतानि त्रिपादस्या मृतन्दिवि ॥** *पाद्यं समर्पयामि।*

अर्घ्य **ॐ त्रिपादूर्ध्वऽ उदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वङ् व्यक्रामत्साशनानशनेऽ अभि ॥** *अर्घ्यं समर्पयामि।*

आचमन **ॐ ततो विराडजायत विराजोऽ अधि पूरुषः। स जातोऽ अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥** *आचमनं समर्पयामि।*

स्नान **ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥** *स्नानं समर्पयामि।*

(दुग्ध, दधि, घृत, मधु और शर्करास्नान के बाद शुद्धोदकस्नान कराएँ)

दुग्ध **ॐ पयः पृथिव्यां पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम् ॥** *दुग्धस्नानं समर्पयामि।*

दधि **ॐ दधिक्राव्णोऽ अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखा करत्प्रणऽ आयूꣳषि तारिषत् ॥** *दधिस्नानं समर्पयामि।*

घृत **ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽ आदिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा ॥** *घृतस्नानं समर्पयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



मधु ॐ मधुवाताऽ ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।। मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः। मधुद्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँऽ२ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥ *मधुस्नानं समर्पयामि।*

शर्करा ॐ अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम्। अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयाम गृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ *शर्करास्नानं स०।*

पञ्चामृतस्नान ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्त्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ *पञ्चामृतस्ना० सम०।*

शुद्धोदकस्नान ॐ कावेरी नर्मदा वेणी तुङ्गभद्रा सरस्वती। गङ्गा च यमुना चैव ताभ्यः स्नानार्थमाहृतम् ॥ गृहाण त्वं रमाकान्त स्नानाय श्रद्धया जलम् ॥ *शुद्धोदकस्नानं समर्पयामि।*

वस्त्र ॐ तस्माद्यज्ञात् सर्वहुतऽ ऋचः सामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ *वस्त्रोपवस्त्रं समर्पयामि।*

यज्ञोपवीत ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ॥ *यज्ञोपवीतं समर्पया०।*

मधुपर्क ॐ दधि मध्वाज्य संयुक्तं पात्रयुग्म-समन्वितम्। मधुपर्कं गृहाण त्वं वरदो भव शोभन ॥ *मधुपर्कं स०, आचमनीयं जलं स०।*

गन्ध ॐ तं यज्ञं वर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥ *गन्धं समर्पयामि।*

अक्षत (श्वेत तिल चढ़ाएँ, चावल नहीं) ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽ अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती यो जान्विन्द्र ते हरि ॥ *अक्षतान् समर्पयामि।*

पुष्प ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳ सुरे स्वाहा ॥ *पुष्पं समर्पयामि।*

पुष्पमाला ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः। अश्वाऽ इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ *पुष्पमाल्यां समर्पयामि।*

तुलसीपत्र ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत् किम्बाहू किमूरू पादाऽ उच्येते ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



तुलसीं हेमरूपां च रत्नरूपां व मञ्जरीम्।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ॥

ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥ *तुलसीपत्रं समर्पयामि।*

*बिल्वपत्र* तुलसीविल्वनिम्बैश्च जम्बीरैरामलैः शुभैः। पञ्चविल्वमितिख्यातं प्रसीद परमेश्वर ॥ *बिल्वपत्रं समर्पयामि।*

*दूर्वा* विष्ण्वादिसर्वदेवानां दूर्वे त्वं प्रीतिदा सदा। क्षीरसागरसम्भूते ! वंशवृद्धिकरी भव ॥ *दूर्वां समर्पयामि।*

*शमीपत्र* शमी शमयते पापं शमी शत्रुविनाशिनी। धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ *शमीपत्रं समर्पयामि।*

*आभूषण* रत्नकङ्कणवैदूर्यमुक्ताहारादिकानि च। सुप्रसन्नेन मनसा दत्तानि स्वीकुरुष्व भोः ॥ *आभूषणानि समर्पयामि।*

*अबीर-गुलाल* नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्। अबीर नामकं चूर्णं गन्धं चारु प्रगृह्यताम् ॥ *अबीरं समर्पयामि।*

*सुगन्धतैल* तैलानि च सुगन्धीनि द्रव्याणि विविधानि च। मया दत्तानि लेपार्थं गृहाण परमेश्वर ॥ *सुगन्धतैलं समर्पयामि।*

*धूप* ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। ऊरू तदस्य यद् वैश्यः पद्भ्याꣳ शूद्रोऽ अजायत ॥ ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः। देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥

*धूपमाघ्रापयामि।*

*दीप* ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽ अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ *दीपं दर्शयामि।*

**नैवेद्य**

तुलसीदल डालकर आगे लिखी पाँच ग्रास-मुद्राएँ दिखाएँ।

**प्राणय स्वाहा**—*कनिष्ठा, अनामिका और अंगूठा मिलाएँ।*

**अपानाय स्वाहा**-*अनामिका, मध्यमा और अंगूठा मिलाएँ।*

**व्यानाय स्वाहा**—*मध्यमा, तर्जनी और अंगूठा मिलाएँ।*

**उदानाय स्वाहा**—*तर्जनी, मध्यमा, अनामिका और अंगूठा मिलाएँ।*

**समानाय स्वाहा**—*सभी अंगुलियां अंगूठे से मिलाएँ।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



ॐ नाभ्याऽ आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँऽ२ अकल्पयन् ॥ यत् पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्मऽ इध्मः शरद्धविः ॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञन्तन्वानाऽ अबध्नन् पुरुषम्पशुम् ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे। तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ वेदाहमेतम्पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात्। तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ प्रजापतिश्चरति गर्भेऽ अन्तरजायमानो बहुधा विजायते। तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥ यो देवेभ्यऽ आतपति यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ रुचं ब्राह्मं जनयन्तो देवाऽ अग्रे तदब्रुवन्। यस्त्वै वं ब्राह्मणो विद्यात्तस्य देवाऽ असन्वशे ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणा मुं मऽ ईषाण सर्व लोकं मऽ ईषाण ॥ *नैवेद्यं निवेदयामि।*

पानीयजल **एलोशीरलवङ्गादि कर्पूरपरिवासितम्। प्राशनार्थं कृतं तोयं गृहाण परमेश्वर ॥** *मध्येपानीयं जलं समर्पयामि।*

ऋतुफल **बीजपूराम्र-मनस-खर्जूरी-कदली-फलम्। नारिकेल फलं दिव्यं गृहाण परमेश्वर ॥** *ऋतुफलं समर्पयामि।*

आचमन **कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम्। आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥** *आचमनीयं जलं समर्पयामि।*

नारियल **फलेन फलितं सर्वं त्रैलोक्यं सचराचरम्। तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ॥** *अखण्ड ऋतुफलं सम०।*

ताम्बूल-पूगीफल **ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्मऽ इध्मः शरद्धविः ॥** *ताम्बूलं समर्पयामि।*

दक्षिणा **पूजाफलसमृद्ध्यर्थं दक्षिणा च तवाग्रतः। स्थापिता तेन मे प्रीतः पूर्णान् कुरु मनोरथान् ॥** *दक्षिणां समर्पयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



## आरती

प्रथम, चरणों की चार, नाभि की दो, मुख की एक या तीन बार और समस्त अंगों की सात बार आरती करें। पश्चात् शंख-जल भक्तों पर छिड़कें।

**कदलीगर्भसम्भूतं कर्पूरन्तु प्रदीपितम्।**
**आरार्तिकमहं कुर्वे पश्य मां वरदो भव ॥**

### श्रीसत्यनारायणजी की आरती

*जय लक्ष्मीरमणा, श्रीलक्ष्मीरमणा।*
*सत्यनारायण स्वामी जनपातक हरणा ॥ जय० ॥*
*रत्न जड़ित सिंहासन अदभुत छवि राजे।*
*नारद करत निराजन घंटा ध्वनि बाजे ॥ जय० ॥*
*प्रगट भये कलि कारन द्विज को दरस दियो।*
*बूढ़ो ब्राह्मण बनके कञ्चन महल कियो ॥ जय० ॥*
*दुर्बल भील कठारो जिनपर कृपा करी।*
*चन्द्रचूड़ एक राजा जिनकी बिपति हरी ॥ जय० ॥*
*वैश्य मनोरथ पायो श्रद्धा तज दीनी।*
*सो फल भोग्यो प्रभुजी फिर अस्तुति कीनी ॥ जय० ॥*
*भाव भक्ति के कारण छिन छिन रूप धर्‍या।*
*श्रद्धा धारण कीनी तिनका काज सर्‍या ॥ जय० ॥*
*ग्वालबाल संग राजा बन में भगति करी।*
*मन बांछित फल दीन्यो दीन दयाल हरी ॥ जय० ॥*
*चढ़त प्रसाद सवायो कदली फल मेवा।*
*धूप दीप तुलसी से राजी सतदेवा ॥ जय० ॥*
*श्रीसत्यनारायणजी की आरती जो कोइ नर गावे।*
*कहत शिवानन्द स्वामी सुख संपति पावे।*
*भणत शिवानन्द स्वामी मनवांछित पावे ॥ जय० ॥*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



## विष्णु-स्तुति

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्,
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥
आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनम्,
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम्।
बालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनम्,
पश्चाद्रावणकुम्भकर्णहननं चैतद्धि रामायणम्॥
आदौ देवकिदेवगर्भजननं गोपीगृहे वर्द्धनम्,
मायापूतनजीवितापहरणं गोवर्द्धनोद्धारणम्।
कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनम्,
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम्॥
कस्तूरीतिलकं ललाटपटले वक्षस्थले कौस्तुभम्,
नासाग्रे वरमौक्तिकं करतले वेणुं करे कङ्कणम्।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली,
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियम्,
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतम्,
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे॥
यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो,
यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः॥
आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनम्,
द्यूतस्त्रीहरणं वने विचरणं मत्स्यालयावेधनम्।
लीलागोहरणं रणे विचरणं सन्ध्याक्रियावर्धनम्,
पश्चाद्भीष्मसुयोधनादिहननं चैतन्महाभारतम्॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियाम्पतिर्लोकपतिर्धरापतिः।
पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः॥
मत्स्याश्वकच्छपनृसिंहवराहहंस राजन्यविप्रविबुधेषु कृतावतारः।
त्वं पाहि नस्त्रिभुवनञ्च यथाधुनेश भारम्भुवो हर यदूत्तम वन्दनं ते॥

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये।
सत्यस्य सत्यं ऋतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः॥
नमोस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादाक्षिशिरोरुबाहवे।
सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटीयुगधारिणे नमः॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः॥
आकाशात्पतितं तोयं यथा गच्छति सागरम्।
सर्वदेवनमस्कारः केशवं प्रतिगच्छति॥
मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्दमाधवम्॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव॥
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः।
त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव॥
कृष्णाय वासुदेवाय हरये परमात्मने।
प्रणतःक्लेशनाशाय गोविन्दाय नमो नमः॥

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरंचिनुतं शरण्यम्।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम्॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधावन् वन्दे महापुरुष ते चरणारविन्दम्॥

अपराधसहस्त्रभाजनं पतितं भीमभवार्णवोदरे।
अगतिं शरणागतं हरे कृपया केवलमात्मसात् कुरु॥
एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



## पुष्पांजलि

ॐ यज्ञेन यज्ञमयजन्तदेवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे। स मे कामान् काम कामाय मह्यं कामेश्वरो वैश्रवणो ददातु॥ कुबेराय वैश्रवणाय महाराजाय नमः। ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति। तदप्येषश्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥ ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देवऽ एकः॥ ॐ तत्पुरुषाय विद्महे नारायणाय धीमहि तन्नो विष्णुः प्रचोदयात्॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वाऽनुसृतस्वभावात्। करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत्॥ *पुष्पाञ्जलिं समर्पयामि॥*

### प्रदक्षिणा

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥

### क्षमा-प्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर॥

### विसर्जन

यजमानंहितार्थाय पुनरागमनाय च।
गच्छन्तु च सुरश्रेष्ठाः! स्वस्थानं परमेश्वराः!॥

### यजमान-आशीर्वाद-मन्त्र

अक्षतान् विप्रहस्तात्तु नित्यं गृह्णन्ति ये नराः।
चत्वारि तेषां वर्धन्ते आयुः कीर्तिर्यशो बलम्॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**ॐ श्रीर्वर्चस्वमायुमायुष्यमारोज्ञमाविधात् पवमानं महीयते।**
**धनं धान्यं पशुं बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः॥** अक्षत दें।

### चरणामृत-ग्रहण-विधि

बाएँ हाथ पर दोहरा वस्त्र रख कर दाहिना हाथ रख दें, पश्चात् चरणामृत लेकर पान करें। जमीन पर न गिरने दें।

### तुलसी-ग्रहण-मन्त्र

**पूजनानन्तरं विष्णोरर्पितं तुलसीदलम्।**
**भक्षयेद्देहशुद्ध्यर्थं चान्द्रायणशताधिकम्॥**

### चरणामृत-ग्रहण-मन्त्र

**कृष्ण! कृष्ण! महाबाहो! भक्तानामार्तिनाशनम्।**
**सर्वपापप्रशमनं पादोदकं प्रयच्छ मे॥**

पश्चात् नीचे लिखा मन्त्र बोलते हुए चरणामृत पान करें।

**अकालमृत्युहरणं सर्वव्याधिविनाशनम्।**
**विष्णुपादोदकं पीत्वा पुनर्जन्म न विद्यते॥**
**दुःखदौर्भाग्यनाशाय सर्वपापक्षयाय च।**
**विष्णोः पञ्चामृतं पीत्वा पुनर्जन्म न विद्यते॥**

### नैवेद्य-ग्रहण-मन्त्र

**नैवेद्यमन्नं तुलसीविमिश्रितम् विशेषतः पादजलेन विष्णोः।**
**योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम्॥**

## शिव-पूजन

पवित्र होकर आचमन-प्रणायाम करके संकल्प-वाक्य के अन्त में **श्रीसाम्बसदाशिवप्रीत्यर्थं गणपत्यादिसकलदेवतापूजनपूर्वक श्रीभवानीशङ्करपूजनं करिष्ये** कहकर संकल्प करें। नीचे लिखे आवाहन मन्त्रों से मूर्तियों के समीप पुष्प छोड़ें। मूर्ति न हो तो आवाहन करके पूजन करें।

### गणपति-पूजन

**आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः।**
**इहागत्य गृहाण त्वं पूजां यागं च रक्ष मे॥**

पूजन करके आगे लिखी प्रार्थना करें।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



लम्बोदर नमस्तुभ्यं सततं मोदकप्रियम्।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।

### पार्वती-पूजन

हिमाद्रितनयां देवीं वरदां शङ्करप्रियाम्।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ।।

पूजन करके नीचे लिखी प्रार्थना करें।

ॐ अम्बेऽ अम्बिकेऽम्बालिके न मा नयति कश्चन।
स सस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।।

### नन्दीश्वर-पूजन

ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरञ्च प्रयन्त्स्वः ।।

पूजन करके नीचे लिखी प्रार्थना करें।

ॐ प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा।
भरन्नग्निम्पुरीष्यम्मा पाद्यायुषः पुरा ।।

### वीरभद्र-पूजन

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमही देवहितं यदायुः।।

पूजन करके नीचे लिखी प्रार्थना करें।

ॐ भद्रो नोऽ अग्निराहुतो भद्रा रातिः सुभग भद्रोऽ अध्वरः।
भद्राऽ उत प्रशस्तया।।

### स्वामी कार्तिक-पूजन

ॐ यदक्रन्दः प्रथमं जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यं महि जातं तेऽ अर्वन्।।

पूजन करके नीचे लिखी प्रार्थना करें।

ॐ यत्र बाणाः सम्पतन्ति कुमारा विशिखाऽ इव।
तन्नऽ इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु।।

### कुबेर-पूजन

ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय।
इहेहैषां कृणुहि भोजनानि ये वर्हिषो नमऽ उक्तिं यजन्ति।।

पूजन करके आगे लिखी प्रार्थना करें।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**ॐ वयꣳ सोमव्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमही ॥**

**कीर्तिमुख-पूजन**

**ॐ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाऽभिभुवे स्वाहाऽधिपतये स्वाहा शूषाय स्वाहा सꣳ सर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतये स्वाहा॥**

पूजन करके नीचे लिखी प्रार्थना करें।

**ॐ ओजश्च मे सहश्च मऽ आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे परूꣳषि च मे शरीराणि च मऽ आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम्॥**

जलहरी में सर्प का आकार हो तो सर्प का पूजन करें, पश्चात् शिव का पूजन करें।

पाद्य **ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो येऽ अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥** *पाद्यं समर्पयामि।*

अर्घ्य **ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा॥** *अर्घ्यं समर्पयामि।*

आचमन **ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥** *आचमनीयं जलं समर्पयामि।*

स्नान **ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽ ऋतसदन्यसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद ॥** *स्नानं समर्पयामि।*

दुग्ध **ॐ गोक्षीरधामन् देवेश गोक्षीरेण मयाकृतम्। स्नपनं देवदेवेश गृहाण शिवशङ्कर ॥** *दुग्धस्नानं सम०, पुनर्जलस्नानं सम०।*

दधि **ॐ दध्ना चैव मया देव स्नपनं क्रियते तव। गृहाण भक्त्या दत्तं मे सुप्रसन्नो भवाव्यय॥** *दधिस्नानं समर्प०, पुनर्जलस्नानं समर्प०।*

घृत **ॐ सर्पिषा देवदेवेश स्नपनं कृयते मया। उमाकान्त गृहाणेदं श्रद्धया सुरसत्तम॥** *घृतस्नानं समर्पयामि, पुनर्जल. समर्पयामि।*

मधु **ॐ इदं मधु मया दत्तं तव तुष्ट्यर्थमेव च। गृहाण शम्भो मे भक्त्या मम शान्तिप्रदो भव॥** *मधुस्नानं स०, पुनर्जलस्नानं स०।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



शर्करा ॐ सितया देवदेवेश स्नपनं क्रियते मया। गृहाण शम्भो मे भक्त्या मम शान्तिप्रदो भव॥ *शर्करास्नानं स., पुनर्जल. स.।*

पञ्चामृत ॐ पञ्चामृतं मयानीतं पयोदधिसमन्वितम्। घृतं मधु शर्करया स्नानार्थं प्रतिगृह्यताम्॥ *पञ्चामृतस्नानं समर्पयामि।*

शुद्धोदक स्ना. ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽ आश्विनाः। श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतये कर्णा यामाऽ अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः॥ *शुद्धोदकस्नानं समर्पयामि।*

**अभिषेक** (जलधारा छोड़ें)

ॐ नमस्ते रुद्र मन्यवऽ उतोतऽ इषवे नमः। बाहुभ्यामुत ते नमः ॥१॥ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२॥ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिꣳ सीः पुरुषं जगत् ॥३॥ शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमनाऽ असत् ॥४॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च जातुधान्योऽधराचीः परा सुव ॥५॥ असौ यस्ताम्रोऽ अरुणऽ उत बभ्रुः सुमङ्गलः। ये चैनꣳ रुद्राऽ अभितो दिक्षु श्रिताः सहस्रसोऽवैषाꣳ हेडऽ ईमहे ॥६॥ असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपाऽ अदृशन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो येऽ अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥८॥ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्। याश्च ते हस्तऽ इषवः परा ता भगवो वप ॥९॥ विज्यं धनुः कपर्दिनो विशल्यो वाणवाँऽ२ उत। अनेशन्नस्य याऽ इषवऽ आभुरस्य निषङ्गधिः ॥१०॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥११॥ परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः। अथो यऽ इषुधिस्तवारेऽ अस्मिन्नि धेहि तम् ॥१२॥ अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥१३॥ नमस्तऽ आयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥१४॥ मा नो महान्तमुत मा नोऽ अर्भकं मा नऽ उक्षन्तमुत मा नऽ उक्षितम्। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥१५॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**मा नस्तोके तनये मा नऽ आयुषि मां नो गोषु मा नोऽ अश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे॥१६॥**

*अभिषेकं समर्पयामि।*

विजया **ॐ विज्यं धनुः कपर्दिनो विशल्यो वाणवाँऽ२ उत। अनेशन्नस्य याऽ इषवऽ आभुरस्य निषं गधिः ॥** *विजयां समर्प०।*

वस्त्र **ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्र्योर्ज्याम्। याश्च ते हस्तऽ इषवः परा ता भगवो वप ॥** *वस्त्रोपवस्त्रं समर्पयामि।*

यज्ञोपवीत **ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽ आवः। स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥** यज्ञोपवीतं समर्प०, यज्ञोपवीतान्ते आचमनीयं जलं स०।

गन्ध **ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥** *गन्धं समर्पयामि।*

अक्षत **ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥** *अक्षतं समर्प०।*

पुष्प **ॐ नमः पार्यायचावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥**

*पुष्पं समर्पयामि।*

पुष्पमाला **नानापङ्कजपुष्पैश्च ग्रथितां पल्लवैरपि। विल्वपत्रयुतां मालां गृहाण सुमनोहराम्॥** *पुष्पमाल्यां समर्पयामि।*

बिल्वपत्र **ॐ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः। श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥**

**काशीवास निवासी च कालभैरव पूजनम्।**
**प्रयागे माघमासे च बिल्वपत्रं शिवार्पणम्॥**
**दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनम्।**
**अघोरपापसंहारं बिल्वपत्रं शिवार्पणम् ॥**
**त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम्।**
**त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम् ॥**
**अखण्डैर्बिल्वपत्रैश्च पूजयेत् शिवशङ्करम्।**
**कोटिकन्यामहादानं बिल्वपत्रं शिवार्पणम्॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**गृहाण बिल्वपत्राणि सपुष्पाणि महेश्वर।**
**सुगन्धीनि भवानीश शिव त्वं कुसुमप्रिय।।**

*बिल्वपत्राणि समर्पयामि।*

तुलसी मंजरी **ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः। मा द्यावापृथिवीऽ अभि शोचीर्मान्तरिक्षं मा वनस्पतीम् ।।**

*तुलसीपत्राणि समर्पयामि।*

दूर्वा **ॐ काण्डात् काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्त्रेण शतेन च।।** *दूर्वां समर्पयामि।*

शमीपत्र **ॐ अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च। दुःस्वप्न नाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम्।।** *शमीपत्रं समपयार्मि।*

आभूषण **ॐ वज्रमाणिक्यवैदूर्यमुक्ताविद्रुममण्डितम्। पुष्पराग-समायुक्तं भूषणं प्रतिगृह्यताम्।।** *आभूषणं समर्पयामि।*

सुगन्ध तैल (अतर) **ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳ सं परिपातु विश्वतः।।** *सुगन्धतैलं समर्पयामि।*

धूप **ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्त्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च।।** *धूपमाघ्रापयामि।*

दीप **ॐ नमऽ आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमऽ ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च।।**

*दीपं दर्शयामि। (हस्तप्रक्षालनम्)*

नैवेद्य **ॐ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भ्याय च नमो जघन्याय च बुध्न्याय च।।**

*नैवेद्यं निवेदयामि।*

पानीय जल **ॐ नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नमऽ उर्वर्जाय च खल्याय च।।** *मध्ये पानीयं जलं समर्पयामि।*

ऋतुफल **ॐ फलानि यानि रम्याणि स्थापितानि तवाग्रतः। तेन मे सफलावाप्तिर्भवेज्जन्मनि-जन्मनि।।** *ऋतुफलं समर्पयामि।*

अ॰ऋतुफल **ॐ कूष्माण्डं मातुलुङ्गं च नारिकेलफलानि च। रम्याणि**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**पार्वतीकान्त सोमेशं प्रतिगृह्यताम् ॥** *अखण्डऋतुफलं समर्प०।*

ताम्बूल पूगीफल **ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽ अस्मिन्ननातुरम्॥** *ताम्बूलपूगीफलं समर्पयामि।*

दक्षिणा **न्यूनातिरिक्तपूजायां सम्पूर्णफलहेतवे। दक्षिणां काञ्चनीं देव स्थापयामि तवाग्रतः॥** *द्रव्यदक्षिणां समर्पयामि।*

## शिवजी की आरती

**कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।**
**सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि॥**

*जै शिव ओंकारा, हो शिव पार्वती प्यारा, हो शिव ऊपर जल धारा।*
*ब्रह्मा विष्णु सदाशिव अर्द्धांगी धारा ॥१ ॥ हर हर हर महादेव ॥*

*एकानन चतुरानन पंचानन राजै।*
*हंसासन गरुड़ासन वृषवाहन साजै ॥ २॥ हर०॥*
*दोय भुज चार चतुर भुज दस भुज ते सोहै।*
*तीनो रूप निरखता त्रिभुवन जन मोहै ॥ ३॥ हर०॥*
*अक्षमाला बनमाला रुण्डमाला धारी।*
*चन्दन मृगमद चन्दा भाले सुभकारी ॥ ४॥ हर०॥*
*श्वेतांबर पीतांबर बाघांबर अंगे।*
*सनकादिक प्रभुतादिक भूतादिक संगे ॥ ५॥ हर०॥*
*करमध्ये कमंडलु चक्र त्रिशुल धर्ता।*
*जगकर्ता जगभर्ता जगपालनकर्ता ॥ ६॥ हर०॥*
*ब्रह्मा विष्णु सदाशिव जानत अविवेका।*
*प्रणवाक्षर के मध्ये ये तीनो एका ॥ ७॥ हर०॥*
*त्रिगुणस्वामीजी की आरती जो कोइ नर गावै।*
*भणत शिवानन्द स्वामी वांछित फल पावै ॥ ८॥ हर०॥*

*जै शिव ओंकारा, हो मन भज शिव ओंकारा, हो मन रट शिव ओंकारा, हो शिव गल रुंडन माला, हो शिव ओढ़त मृग छाला, हो शिव पीते भंग प्याला, हो शिव रहते मतवाला, हो शिव पारवती प्यारा, हो शिव ऊपर जल धारा, ब्रह्मा विष्णु सदाशिव, ब्रह्मा विष्णु सदाशिव अर्द्धांगी धारा ॥ हर हर हर महादेव॥*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**शिव-स्तुति** (पुष्पांजलि)

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे,
सुरतरुवरशाखा लेखनीपत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं,
तदपि तवगुणानामीशपारं न याति ॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणम्,
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशाङ्कवह्निननयनं वन्दे मुकुन्दप्रियम्,
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥
शान्तं पद्मासनस्थं शशिधरमुकुटं पञ्चवक्त्रं त्रिनेत्रम्,
शूलं बज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम्।
नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे,
नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥
श्मशानेस्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्त्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं,
तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥
त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव ॥
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः।
त्राहि मां पार्वतीनाथ सर्वपापहरो भव ॥
कालहर कण्टकहर दुःखहर दारिद्र्यहर

आगे लिखे मन्त्र से गाल बजाते हुए **बम् बम्** बोल कर जलहरी का जल नेत्रों पर लगाएँ।

**निरावलम्बस्य ममावलम्बं विपाटिताशेषविपत्कदम्बम्।**
**मदीयपापाचलपापशम्बं प्रवर्ततां वाचि सदैव बम्-बम् ॥**

पञ्चांग-प्रणाम, मन में स्मरण, नेत्रों से दर्शन और वाणी से नामोच्चार करते हुए, दोनों हाथ जोड़ कर मस्तक झुका कर प्रणाम करें।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**प्रदक्षिणा** (अर्धप्रदक्षिणा करें)

**यानि कानि च पापानि ज्ञाताज्ञातकृतानि च।**
**तानि सर्वाणि नश्यन्ति प्रदक्षिण पदे पदे।।**

**क्षमा-प्रार्थना**

**प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्।।**
**आवाहनं न जानामि न जानामि विसर्जनम्।**
**पूजां चैव न जानामि क्षमस्व परमेश्वर।।**
**अन्यथा शरणं नास्ति त्वमेकं शरणं मम।**
**तस्मात् कारुण्यभावेन रक्ष रक्ष महेश्वर।।**

*अनेन पूजनेन श्रीसाम्बसदाशिवः प्रीयताम्।*

## पार्थिव-शिव-पूजन

पवित्र होकर संकल्प वाक्य के अन्त में **पार्थिवलिङ्गपूजनं करिष्ये** कहकर संकल्प का जल छोड़ें।

**भूमि-प्रार्थना**

**सर्वाधारे धरे देवि त्वद्रूपां मृत्तिकामिमाम्।**
**ग्रहिश्यामि प्रसन्ना त्वं लिङ्गार्थं भव सुप्रभे।।**
**ॐ ह्रां पृथिव्यै नमः।**
**उद्धृतासि वराहेण कृष्णेन शतबाहुना।**
**मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च।।**

**ॐ हराय नमः** मृत्तिका ग्रहण करें। **ॐ बं अमृताय नमः** जल को अभिमन्त्रित करें। **ॐ महेश्वराय नमः** मूर्ति बनाएँ। **ॐ शूलपाणये नमः** मूर्ति स्थापित करें।

विनियोग **ॐ अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेव ऋषिरनुष्टुप्छन्दः श्रीसदाशिवो देवता, ॐ बीजं, नमः शक्तिः, शिवाय कीलकं मम साम्बसदाशिवप्रीत्यर्थं न्यासे पूजने जपे च विनियोगः।।**

*अङ्गन्यास* **ॐ वामदेवाय ऋषये नमः** *शिरसि*। **ॐ अनुष्टुप् छन्दसे नमः** *मुखे*। **ॐ सदाशिवदेवतायै नमः** *हृदि*। **ॐ बीजाय नमः** *गुह्ये*। **ॐ शक्तये नमः** *पादयोः*। **ॐ शिवाय कीलकाय नमः** *सर्वांगे*। **ॐ नं**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**तत्पुरुषाय नमो** *हृदये*। **ॐ मं अघोराय नमः** *पादयोः*। **ॐ शिं सद्योजाताय नमः** *गुह्ये*। **ॐ वां वामदेवाय नमः** *मूर्ध्नि*। **ॐ यं ईशानाय नमः** *मुखे*। **ॐ अङ्गुष्ठाभ्यां नमः। ॐ नं तर्जनीभ्यां नमः। ॐ मं मध्यमाभ्यां वषट्। ॐ शिं अनामिकाभ्यां नमः। ॐ वां कनिष्ठिकाभ्यां वौषट्। ॐ यं करतलकरपृष्ठाभ्यां फट्। ॐ हृदयाय नमः। ॐ नं शिरसे स्वाहा। ॐ मं शिखायै वषट्। ॐ शिं कवचाय हुम्। ॐ वां नेत्राभ्यां वौषट्। ॐ यं अस्त्राय फट् ॥**

विनियोग **ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मा-विष्णु-महेश्वराः ऋषयः ऋग्यजुःसामानिच्छन्दांसि क्रियामयवपुः प्राणाख्या देवता ॐ आं बीजं ह्रीं शक्तिः क्रौं कीलकं देवप्राणप्रतिष्ठापने विनियोगः॥**

प्रतिष्ठा **ॐ ब्रह्म-विष्णु-रुद्र ऋषिभ्यो नमः** *शिरसि*। **ॐ ऋग्यजुः सामच्छन्देभ्यो नमो मुखे। ॐ प्राणाख्यदेवतायै नमः** *हृदि*। **ॐ आं बीजाय नमो** *गुह्ये*। **ॐ ह्रीं शक्तये नमः** *पादयोः*। **ॐ क्रौं कीलकाय नमः** *सर्वांगे* ॥ इति अङ्गन्यासं कृत्वा।

**ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य प्राणा इह प्राणाः। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य जीव इह स्थितः। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रघ्राणजिह्वापाणिपाद-पायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥**

नीचे लिखे मन्त्र से पुष्प समर्पण करें।

**ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि। ॐ भुवः पुरुषं साम्बसदाशिवमावाहयामि। ॐ स्वः पुरुषं साम्बसदाशिव-मावाहयामि ॥** इत्यावाहयेत्। **ॐ स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम्। तावत् त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु ॥**

पूजन कर आगे लिखे मन्त्र से विसर्जन करें।

**ॐ हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।**
**शिवः पशुपतिश्चैव महादेव-विसर्जनम् ॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



## दुर्गा-पूजन

शुद्ध मृत्तिका में यव अथवा गेहूं रोपण कर उसपर कलश-स्थापन विधि से कलश स्थापन करें। आचमन, प्राणायाम करके संकल्प वाक्य के अन्त में **ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकं दीर्घायुर्विपुलधनपुत्रपौत्राद्यविच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभ-शत्रुपराजयप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थं कलशस्थापनं दुर्गापूजनं तत्र निर्विघ्नतासिद्ध्यर्थं स्वस्तिवाचनं, पुण्याहवाचनं, गणपत्यादि-पूजनं च करिष्ये** कह कर संकल्प करें। पश्चात् नीचे लिखे संकल्प से ब्राह्मण का वरण करें।

**ॐ अद्य श्रीदुर्गापूजनपूर्वकं मार्कण्डेयपुराणान्तर्गत दुर्गासप्त-शतीपाठकरणार्थम् एभिर्वरणद्रव्यैः अमुक गोत्रम् अमुक शर्माणं ब्राह्मणं त्वामहं वृणे।।** पश्चात् ब्राह्मण **वृतोस्मि** कहें।

पूर्वोक्त विधि से स्वस्तिवाचन, पुण्याहवाचन, गणपति-गौरीपूजन, कलश स्थापन, नवग्रह, पञ्चलोकपाल, दशदिक्पाल, षोडशमात्रिका तथा चतुःषष्टि योगिनी पूजन करके भगवती-वाहन, भैरव, क्षेत्रपाल तथा ध्वजा आदिका पूजन करें, पश्चात् नीचे लिखे ध्यान करें।

### भैरव-ध्यान

**ॐ करकलितकपालः कुण्डली दण्डपाणि-**
**स्तरुणतिमिरनीलो व्यालयज्ञोपवीती।**
**क्रतुसमयसपर्या विघ्नविच्छेदहेतु-**
**र्जयति बटुकनाथः सिद्धिदः साधकानाम् ।।**

### देवी-ध्यान

**ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां**
**कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितम्।**
**हस्तैश्चक्रगदासिखेटविशिखाँश्चापं गुणं तर्जनीं**
**विभ्राणमनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ।।**

आवाहन **ॐ आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि। पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये।।** *आवाहयामि।*

आसन **ॐ अनेकरत्नसंयुक्तं नानामणिगणान्वितम्। कार्तस्वरमयं**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



दिव्यमासनं प्रतिगृह्यताम्।। *आसनं समर्पयामि।*

पाद्य ॐ गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम्। तोयमेतत्-सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम्।। *पाद्यं समर्पयामि।*

अर्घ्य ॐ गन्धपुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया। गृहाण त्वं महादेवि प्रसन्ना भव सर्वदा।। *अर्घ्यं समर्पयामि।*

आचमन ॐ आचम्यतां त्वया देवि भक्तिं मे ह्यचलां कुरु। ईप्सितं मे वरं देहि परत्र च पराङ्गतिम्।। *आचमनं समर्पयामि।*

स्नान ॐ जाह्नवीतोयमानीतं शुभं कर्पूरसंयुतम्। स्नापयामि सुरश्रेष्ठे त्वां पुत्रादिफलप्रदाम्।। *स्नानं समर्पयामि।*

पञ्चामृतस्नान ॐ पयो दधि घृतं क्षौद्रं सितया च समन्वितम्। पञ्चामृतमनेनाद्य कुरु स्नानं दयानिधे।। *पञ्चामृतस्नानं स०।*

शुद्धोदकस्नान ॐ परमानन्दबोधाब्धिनिमग्ननिजमूर्तये। साङ्गो-पाङ्गमिदं स्नानं कल्पयाम्यहमीशिते।। *शुद्धोदकस्नानं समर्प०।*

वस्त्र ॐ वस्त्रञ्च सोमदेवत्यं लज्जायास्तु निवारणम्। मया निवेदितं भक्त्या गृहाण परमेश्वरी।। *वस्त्रं समर्पयामि।*

उपवस्त्र ॐ यामाश्रित्य महामाया जगत्सम्मोहिनी सदा। तस्यै ते परमेशायै कल्पयाम्युत्तरीयकम्।। *उपवस्त्रं समर्पयामि।*

मधुपर्क ॐ दधिमध्वाज्यसंयुक्तं पात्रयुग्मसमन्वितम्। मधुपर्कं गृहाण त्वं वरदा भव शोभने।। *मधुपर्कं समर्पयामि।*

गन्ध ॐ परमानन्दसौभाग्यपरिपूर्णदिगन्तरे। गृहाण परमं गन्ध कृपया परमेश्वरी।। *गन्धं समर्पयामि।*

कुङ्कुम ॐ कुङ्कुमं कान्तिदं दिव्यं कामिनीकामसंभवम्। कुङ्कुमेनार्चिते देवि प्रसीद परमेश्वरी।। *कुङ्कुमं समर्पयामि।*

आभूषण ॐ हारकङ्कणकेयूरमेखलाकुण्डलादिभिः। रत्नाढ्यं कुण्डलोपेतं भूषणं प्रतिगृह्यताम्।। *आभूषणं समर्पयामि।*

सिन्दूर ॐ सिन्दूरमरुणाभासं जपाकुसुमसन्निभम्। पूजितासि मया देवि प्रसीद परमेश्वरि।। *सिन्दूरं समर्पयामि।*

कज्जल ॐ चक्षुर्भ्यां कज्जलं रम्यं सुभगे शान्तिकारिके। कर्पूर-ज्योतिरुत्पन्नं गृहाण परमेश्वरि।। *कज्जलं समर्पयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



सौभाग्यद्रव्य ॐ सौभाग्यसूत्र वरदे सुवर्णमणिसंयुते। कण्ठे बध्नामि देवेशि सौभाग्यं देहि मे सदा।। *सौभाग्यद्रव्यं समर्पयामि।*

सुगन्धतैल (अतर) ॐ चन्दनागरुकर्पूरैः संयुतं कुङ्कुमं तथा। कस्तूर्यादिसुगन्धाँश्च सर्वाङ्गेषु विलेपनम्।। *सुगन्धतैलं सम.।*

परिमलद्रव्य ॐ हरिद्रारंजिते देवि सुखसौभाग्यदायिनि। तस्मात्त्वां पूजयाम्यत्र सुखशान्तिं प्रयच्छ मे।। *परिमलद्रव्यं समर्पयामि।*

अक्षत ॐ रंजिताः कुङ्कुमौघेन अक्षताश्चातिशोभनाः। ममैषां देवि दानेन प्रसन्ना भव शोभने।। *अक्षतं समर्पयामि।*

पुष्प ॐ मन्दारपारिजातादि पाटलीकेतकानि च। जातीचम्पक-पुष्पाणि गृहाणेमानि शोभने।। *पुष्पं समर्पयामि।*

पुष्पमाला ॐ सुरभिपुष्पनिचयैः ग्रथितां शुभमालिकाम्। ददामि तव शोभार्थं गृहाण परमेश्वरि।। *पुष्पमाल्यां समर्पयामि।*

विल्वपत्र ॐ अमृतोद्भवः श्रीवृक्षो महादेवि प्रियः सदा। विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि।। *विल्वपत्रं समर्पयामि।*

धूप ॐ दशाङ्गगुग्गुलं धूपं चन्दनागरुसंयुतम्। समर्पितं मया भक्त्या महादेवि प्रगृह्यताम्।। *धूपमाघ्रापयामि।*

दीप ॐ घृतवर्तिसमायुक्तं महातेजो महोज्वलम्। दीपं दास्यामि देवेशि सुप्रीता भव सर्वदा।। *दीपं दर्शयामि। (हस्तप्रक्षालनम्)*

नैवेद्य ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्। नैवेद्यं गृह्यतां देवि भक्तिं मे ह्यचलां कुरु।। *नैवेद्यं निवेदयामि।*

*मध्येपानीयं जलं समर्पयामि।*

ऋतुफल ॐ द्राक्षाखर्जूरकदलीपनसाम्रकपित्थकम्। नारिकेलेक्षु-जम्ब्वादि फलानि प्रतिगृह्यन्ताम्।। *ऋतुफलं समर्पयामि।*

आचमन ॐ कामारिवल्लभे देवि कुर्वाचमनमम्बिके। निरन्तरमहं वन्दे चरणौ तव चण्डिके।। *आचमनं समर्पयामि।*

अ॰ ऋतुफल ॐ नारिकेलं च नारंगं कलिंगं मंजिरं तथा। उर्वारुकञ्च देवेशि फलान्येतानि गृह्यन्ताम्।। *अखण्ड ऋतुफलं समर्प॰।*

ताम्बूलपूगीफल ॐ एलालवङ्गकस्तूरीकर्पूरैः पुष्पवासिताम्। वीटिकां

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



**मुखवासार्थमर्पयामि सुरेश्वरि।।** *ताम्बूलपूगीफलं समर्पयामि।*

दक्षिणा **ॐ पूजाफलसमृद्ध्यर्थं तवाग्रे द्रव्यमीश्वरि। स्थापितं तेन मे प्रीता पूर्णान् कुरु मनोरथान्।।** *द्रव्यदक्षिणां समर्पयामि।*

**पुस्तक-पूजन** (जल से न करें)

**ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।**
**नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।।**

**ज्योति-पूजन** (पूजन करके प्रार्थना करें)

**ॐ शुभं भवतु कल्याणमारोग्यं पुष्टिवर्धनम्।**
**आत्मतत्त्वप्रबोधाय दीपज्योतिर्नमोऽस्तु ते।।**

## कुमारी-पूजन

२ वर्ष से १० वर्ष तक की कन्या का पूजन कर भोजन कराएँ।

प्रार्थना **ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिस्वरूपिणी।**
**पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते।।**

आरती **ॐ नीराजनं सुमाङ्गल्यं कर्पूरेण समन्वितम्।**
**चन्द्रार्कवह्निसदृशं महादेवि नमोऽस्तु ते।।**

## दुर्गाजी की आरती

*जय अम्बे गौरी, मैया जयमंगल मूर्ती, मैया जय आनन्दकरणी,*
*तुमको निसिदिन ध्यावत हरि ब्रह्मा शिवजी।। जय अम्बे गौरी।।*

*माँग सिन्दूर बिराजत टीको मृगमद को।*
*उज्वल से दोउ नैना चन्द्र बदन नीको।। जय०।।*
*कनक समान कलेवर रक्ताम्बर राजै।*
*रक्तपुष्प बनमाला कंठन पर साजै।। जय०।।*
*केहरिवाहन राजत खड्ग खप्पर धारी।*
*सुर नर मुनि जन सेवत तिनके दुःख हारी।। जय०।।*
*कानन कुंडल सोभित नासाग्रे मोती।*
*कोटिक चन्द्र दिवाकर राजत सम ज्योती।। जय०।।*
*शुम्भ निशुम्भ विडारे महिषासुर घाती।*
*धूम्र विलोचन नासिनि निसिदिन मदमाती।। जय०।।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



*चौंसठ योगिनि गावत नृत्य करत भैरूँ।*
*बाजत ताल मृदंगा और बाजत डमरू॥ जय०॥*
*भुजा चार अति सोभित खड्ग खप्पर धारी।*
*मन वांछित फल पावत सेवत नर नारी॥ जय०॥*
*कंचन थाल बिराजत अगर कपूर बाती।*
*श्रीमालकेतु में राजत कोटिरतन ज्योती॥ जय०॥*
*या अम्बेजी की आरती जो कोइ नर गावै।*
*भणत शिवानन्द स्वामी सुख सम्पति पावै॥ जय०॥*

पुष्पांजलि — **ॐ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीवशुभां ददासि। दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता॥**

प्रदक्षिणा — **ॐ नमस्ते देवि-देवेशि नमस्ते ईप्सितप्रदे। नमस्ते जगतां धात्रि नमस्ते भक्तवत्सले॥**

साष्टांगप्रणाम — **ॐ नमः सर्वहितार्थायै जगदाधारहेतवे। साष्टाङ्गोऽयं प्रणामस्तु प्रयत्नेन मया कृतः॥**

प्रार्थना — **ॐ पुत्रान्देहि धनं देहि सौभाग्यं देहि मङ्गले। अन्याँश्च सर्वकामाँश्च देहि देवि नमोऽस्तु ते॥**

विसर्जन — **ॐ इमां पूजां मया देवि यथाशक्त्युपपादिताम्। रक्षार्थं त्वं समादाय व्रज स्थानमनुत्तमम्॥**

## श्रीमहालक्ष्मी-पूजन

आचमन प्राणायाम करके संकल्पवाक्य के अन्त में **स्थिरलक्ष्मी-प्राप्त्यर्थं श्रीमहालक्ष्मीप्रीत्यर्थं सर्वारिष्टनिवृत्तिपूर्वकसर्वाभीष्टफल-प्राप्त्यर्थम् आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं व्यापारे लाभार्थं च गणपति-नवग्रह-कलशादिपूजनपूर्वकं श्रीमहाकाली-महालक्ष्मी-महासरस्वती-लेखनी-कुबेरादीनां च पूजनं करिष्ये** कहकर जल छोड़ें। पश्चात् गणपति, कलश और नवग्रहादि का पूर्वोक्त विधि से पूजन करके महालक्ष्मी का पूजन करें।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



ध्यान **ॐ या सा पद्मासनस्थाविपुलकटितटी पद्मपत्रायताक्षी गम्भीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया। या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुम्भैः सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता।।**

आवाहन **ॐ सर्वलोकस्य जननीं शूलहस्तां त्रिलोचनाम्। सर्वदेवमयीमीशां देवीमावाहयाम्यहम्।।** *दुर्गायै नमः आवाहयामि।*

आसन **ॐ तप्तकाञ्चनवर्णाभं मुक्तामणिविराजितम्। अमलं कमलं दिव्यमासनं प्रतिगृह्यताम्।।** *आसनं समर्पयामि।*

पाद्य **ॐ गङ्गादितीर्थसम्भूतं गन्धपुष्पादिभिर्युतम्। पाद्यं ददाम्यहं देवि गृहाणाशु नमोऽस्तु ते।।** *पाद्यं समर्पयामि।*

अर्घ्य **ॐ अष्टगन्धसमायुक्तं स्वर्णपात्रप्रपूरितम्। अर्घ्यं गृहाण मद्दत्तं महालक्ष्मि नमोऽस्तु ते।।** *अर्घ्यं समर्पयामि।*

आचमन **ॐ सर्वलोकस्य या शक्तिर्ब्रह्मविष्ण्वादिभिः स्तुता। ददाम्याचमनं तस्यै महालक्ष्म्यै मनोहरम्।।** *आचमनं समर्पयामि।*

स्नान **ॐ मन्दाकिन्याः समानीतैर्हेमाम्भोरुहवासितैः। स्नानं कुरुष्व देवेशि सलिलैश्च सुगन्धिभिः।।** *स्नानं समर्पयामि।*

(दुग्ध, दधि, घृत, मधु तथा शर्करास्नान विधि पृ० ५२ के अनुसार)

पञ्चामृतस्नान **ॐ पञ्चामृतसमायुक्तं जाह्नवी सलिलं शुभम्। गृहाणविश्वजननि स्नानार्थं भक्तवत्सले।।** *पंचामृतस्नानं समर्प.।*

शुद्धोदकस्नान **ॐ तोयं तव महादेवि कर्पूरागुरुवासितम्। तीर्थेभ्यः सुसमानीतं स्नानार्थं प्रतिगृह्यताम्।।** *शुद्धोदकस्नानं समर्पयामि।*

वस्त्र **ॐ दिव्याम्बरं नूतनं हि क्षौमं त्वतिमनोहरम्। दीयमानं मया देवि गृहाण जगदम्बिके।।** *वस्त्रं समर्पयामि।*

उपवस्त्र **ॐ कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम्। गृहाण त्वं मया दत्तं मङ्गले जगदीश्वरी।।** *उपवस्त्रं समर्पयामि।*

मधुपर्क **ॐ कपिलं दधि कुन्देन्दुधवलं मधुसंयुतम्। स्वर्णपात्र स्थितं देवि मधुपर्कं गृहाण भोः।।** *मधुपर्कं समर्पयामि।*

आभूषण **ॐ स्वभावसुन्दराङ्गायै नानादेवाश्रये शुभे। भूषणानि विचित्राणि कल्पयाम्यमरार्चिते।।** *आभूषणं समर्पयामि।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



गन्ध **ॐ श्रीखण्डागरुकर्पूरमृगनाभिसमन्वितम्। विलेपनं गृहाणाशु नमोऽस्तु भक्तवत्सले॥** *गन्धं समर्पयामि।*

रक्तचंदन **ॐ रक्तचन्दनसम्मिश्रं पारिजातसमुद्भवम्। मया दत्तं गृहाणाशु चन्दनं गन्धसंयुतम्॥** *रक्तचंदनं समर्पयामि।*

सिन्दूर **ॐ सिन्दूरं रक्तवर्णं च सिन्दूरतिलकप्रिये। भक्त्या दत्तं मया देवि सिन्दूरं प्रतिगृह्यताम्॥** *सिन्दूरं समर्पयामि।*

कुङ्कुम **ॐ कुङ्कुमं कामदं दिव्यं कुङ्कुमं कामरूपिणम्। अखण्ड कामसौभाग्यं कुङ्कुमं प्रतिगृह्यताम्॥** *कुंकुमं समर्पयामि।*

अक्षत **ॐ अक्षतान्निर्मलांछुद्धान् मुक्तामणिसमन्वितान्। गृहाणेमान् महादेवि देहि मे निर्मलां धियम्॥** *अक्षतं समर्पयामि।*

पुष्प **ॐ मन्दारपारिजाताद्याः पाटली केतकी तथा। मरुवा मोगरं चैव गृहाणाशु नमो नमः॥** *पुष्पं समर्पयामि।*

पुष्पमाला **ॐ पद्मशङ्खजपापुष्पैः शतपत्रैर्विचित्रिताम्। पुष्पमालां प्रयच्छामि गृहाण त्वं सुरेश्वरि॥** *पुष्पमाल्यां समर्पयामि।*

दूर्वा **ॐ विष्ण्वादिसर्वदेवानां प्रियां सर्वसुशोभनाम्। क्षीरसागरसम्भूते दूर्वां स्वीकुरु सर्वदा॥** *दुर्वां समर्पयामि।*

अतर **ॐ स्नेहं गृहाण स्नेहेन लोकेश्वरि दयानिधे। सर्वलोकस्य जननि ददामि स्नेहमुत्तमम्॥** *सुगन्धतैलं समर्पयामि।*

अथाङ्गपूजा। **ॐ चपलायै नमः** *पादौ पूजयामि।* **ॐ चञ्चलायै नमः** *जानुनि पूजयामि।* **ॐ कमलायै नमः** *कटिं पूजयामि।* **ॐ कात्यायिन्यै नमः** *नाभिं पूजयामि।* **ॐ जगन्मात्रे नमः** *जठरं पूजयामि।* **ॐ विश्ववल्लभायै नमः** *वक्षस्थलं पूजयामि।* **ॐ कमलवासिन्यै नमः** *भुजौ पूजयामि।* **ॐ पद्मकमलायै नमः** *मुखं पूजयामि।* **ॐ कमलपत्राक्ष्यै नमः** *नेत्रत्रयं पूजयामि।* **ॐ श्रियै नमः** *शिरः पूजयामि।* इत्यङ्गपूजा।

अथ पूर्वादिक्रमेण अष्टदिक्षु अष्टसिद्धीः पूजयेत्। **ॐ अणिम्ने नमः। ॐ महिम्ने नमः। ॐ गरिम्णे नमः। ॐ लघिम्ने नमः। ॐ प्राप्त्यै नमः। ॐ प्राकाम्यै नमः।ॐ ईशितायै नमः। ॐ वशितायै नमः॥** इति अष्टसिद्धिपूजनम्।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



तथैवं पूर्वादिक्रमेण अष्टलक्ष्मी-पूजनम् । **ॐ आद्यलक्ष्म्यै नमः। ॐ विद्यालक्ष्म्यै नमः। ॐ सौभाग्यलक्ष्म्यै नमः। ॐ अमृतलक्ष्म्यै नमः। ॐ कामलक्ष्म्यै नमः। ॐ सत्यलक्ष्म्यै नमः। ॐ भोगलक्ष्म्यै नमः। ॐ योगलक्ष्म्यै नमः।।** इति अष्टलक्ष्मीपूजनम्।

धूप **ॐ वनस्पतिरसोत्पन्नो गन्धाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।।** *धूपमाघ्रापयामि।*

दीप **ॐ कार्पासवर्तिसंयुक्तं घृतयुक्तं मनोहरम्। तमोनाशकरं दीपं गृहाण परमेश्वरि।।** *दीपं दर्शयामि।*

नैवेद्य **ॐ नैवेद्यं गृह्यतां देवि भक्ष्यभोज्यसमन्वितम्। षड्रसैरन्वितं दिव्यं लक्ष्मि देवि नमोऽस्तु ते।।** *नैवेद्यं निवेदयामि। मध्ये पानीयं जलं समर्पयामि।*

ऋतुफल **ॐ फलेन फलितं सर्वं त्रैलोक्यं सचराचरम्। तस्मात्फल-प्रदानेन पूर्णाः सन्तु मनोरथाः।।** *ऋतुफलं समर्पयामि।*

आचमन **ॐ शीतलं निर्मलं तोयं कर्पूरेण सुवासितम्। आचम्य-तामिदं देवि प्रसीद त्वं महेश्वरि।।** *आचमनीयं जलं समर्पयामि।*

अखण्डऋतुफल **ॐ इदं फलं मयाऽनीतं सरसं च निवेदितम्। गृहाण परमेशानि प्रसीद प्रणमाम्यहम्।।** *अखण्डऋतुफलं समर्पयामि।*

ताम्बूलपूगीफल **ॐ एलालवङ्गकर्पूरनागपत्रादिभिर्युतम्। पूगीफलेन संयुक्तं ताम्बूलं प्रतिगृह्यताम्।।** *ताम्बूलपूगीफलं समर्पयामि।*

दक्षिणा **ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्य-फलदमतः शान्तिं प्रयच्छ मे।।** *द्रव्यदक्षिणां समर्पयामि।*

**प्रार्थना**

**ॐ सुरासुरेन्द्रादिकिरीटमौक्तिकैर्युक्तं सदा यत्तवपादपङ्कजम्।**
**परावरं पातु वरं सुमङ्गलं नमामि भक्त्या तव कामसिद्धये।।**

**भवानि त्वं महालक्ष्मीः सर्वकामप्रदायिनी।**
**सुपूजिता प्रसन्ना स्यान्महालक्ष्मि नमोऽस्तु ते।।**
**नमस्ते सर्वदेवानां वरदासि हरिप्रिये।**
**या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात्।।**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



## महाकाली-पूजन

दवात में मौली बाँध, तथा स्वस्तिक बनाकर नीचे लिखा ध्यान करें।

**ॐ मसि त्वं लेखनीयुक्ता चित्रगुप्ताशयस्थिता।**
**सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥**
**या मया प्रकृतिः शक्तिश्चण्डमुण्डविमर्दिनी।**
**सा पूज्या सर्वदेवैश्च ह्यस्माकं वरदा भव ॥**

**ॐ श्री महाकाल्यै नमः।** पूजन कर नीचे लिखी प्रार्थना करें।

**ॐ या कालिका रोगहरा सुवन्द्या वैश्यैः समस्तैर्व्यवहारदक्षैः।**
**जनैर्जनानां भयहारिणी च सा देवमाता मयि सौख्यदात्री ॥**

## लेखनी-पूजन

कलम पर मौली बांध कर नीचे लिखा ध्यान करके पूजन करें।

**ॐ शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं**
**वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।**
**हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां**
**वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥**

**लेखिन्यै नमः।** पूजन कर नीचे लिखी प्रार्थना करें।

**ॐ कृष्णानने द्विजिह्वे च चित्रगुप्तकरस्थिते।**
**सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥**

बही, वसना आदि में केशर या रोली से स्वस्तिक बनाकर नीचे लिखा ध्यान करके पूजन करें।

**ॐ या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता**
**या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।**
**या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता**
**सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥**

**ॐ वीणापुस्तकधारिण्यै नमः।** पूजनकर नीचे लिखी प्रार्थना करें।

**ॐ शारदा शारदाम्भोजवदना वदनाम्बुजे।**
**सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥**

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



### कुबेर-पूजन

संदूक आदि में सिन्दूर से स्वस्तिक बना, आवाहन करके पूजन करें।

**आवाहयामि देव त्वमिहायाहिकृपां कुरु।**
**कोशं वर्द्धय नित्यं त्वं परिरक्ष सुरेश्वर।।**

प्रार्थना **ॐ धनाध्यक्षाय देवाय नरयानोपवेशिने।**
**नमस्ते राजराजाय कुबेराय महात्मने।।**

### तुला तथा मान-पूजन

सिंदूर से स्वस्तिक बनाकर पूजन करें, पश्चात् नीचे लिखी प्रार्थना करें।

**नमस्ते सर्वदेवानां शक्तित्वे सत्यमाश्रिते।**
**साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना।।**

### दीपावली-पूजन

दीपक जलाकर पात्र में रख, पूजन करके नीचे लिखी प्रार्थना करें।

**भो दीप त्वं ब्रह्मरूप अन्धकारनिवारक।**
**इमां मया कृतां पूजां गृहणँस्तेजः प्रवर्धय।।**

*ॐ दीपेभ्यो नमः।*

आरती **ॐ चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम्।**
**आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरी।।**

### श्रीलक्ष्मीजी की आरती

*जय लक्ष्मी माता, मैया जय लक्ष्मी माता।*
*तुमको निसि दिन सेवत हर विष्णु धाता।। जय० ।।*
*ब्रह्माणी रुद्राणी कमला जगमाता।*
*सूर्य चन्द्रमा ध्याता नारद ऋषि गाता।। जय० ।।*
*दुर्गा रूप निरंजनि सुख संपति दाता।*
*जो कोइ तुमको ध्यावत ऋधि सिधि धन पाता।। जय० ।।*
*तूं ही पताल बसन्ती तूं ही शुभ दाता।*
*कर्मप्रभाव-प्रकाशक जगनिधि से त्राता।। जय० ।।*
*जिस घर में थारो वासो वाहि में गुण आता।*
*कर न सकै सोइ करले मन नहि धड़काता।। जय० ।।*
*तुम बिन यज्ञ न होवे वस्त्र न होय राता।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



खान पान को विभवै तुम बिन कुण दाता॥ जय॰ ॥
शुभ गुण सुंदर युक्ता क्षीरनिधी जाता।
रत्न चतुर्दस तोकूं कोइ भी नहि पाता॥ जय॰ ॥
या आरती लक्ष्मीजी की जो कोइ नर गाता।
उर आनन्द अति उमगे पाप उतर जाता॥ जय॰ ॥
स्थिर चर जगत बचावै कर्म प्रेर ल्याता।
'रामप्रताप' मैया की शुभ दृष्टी चाहता॥ जय॰ ॥

## श्रीशंकटनाशनगणेशस्तोत्र

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्तावासं स्मरेन्नित्यमायुष्कामार्थसिद्धये ॥१॥
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥२॥
लम्बोदरं पञ्चमं च षष्टं विकटमेव च।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम् ॥३॥
नवमं भालचन्द्रं च दशमं तु विनायकम्।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥४॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
न च विघ्नभयं तस्य सर्वसिद्धिश्च जायते ॥५॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम् ॥६॥
जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत्।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥७॥
अष्टाभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत्।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥८॥

*श्रीनारदपुराणे सङ्कटनाशननाम गणेशस्तोत्रं सम्पूर्णम्॥*

## सत्यनारायणाष्टक

आदिदेवं जगत्कारणं श्रीधरं लोकनाथं विभुं व्यापकं शङ्करम्।
सर्वभक्तेष्टदं मुक्तिदं माधवं सत्यनारायणं विष्णुमीशम्भजे॥१
सर्वदा लोककल्याणपारायणं देवगोविप्ररक्षार्थसद्विग्रहम्।
दीनहीनात्मभक्ताश्रयं सुन्दरं सत्यनारायणं विष्णुमीशम्भजे॥२

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



दक्षिणे यस्य गङ्गा शुभा शोभते राजते सा रमा यस्य वामे सदा।
यः प्रसन्नाननो भातिभव्यश्च तं सत्यनारायणं विष्णुमीशम्भजे।।३
सङ्कटे सङ्गरे यं जनः सर्वदा स्वात्मभीनाशनाय स्मरेत् पीडितः।
पूर्णकृत्यो भवेद् यत्प्रसादाच्च तं सत्यनारायणं विष्णुमीशम्भजे।।४
वांछितं दुर्लभं यो ददाति प्रभुः साधवे स्वात्मभक्ताय भक्तिप्रियः।
सर्वभूताश्रयं तं हि विश्वम्भरं सत्यनारायणं विष्णुमीशम्भजे।।५
ब्राह्मणः साधुवैश्यश्च तुङ्गध्वजो येऽभवन् विश्रुतायस्यभक्त्याऽमराः।
लीलया यस्य विश्वं ततं तं विभुं सत्यनारायणं विष्णुमीशम्भजे।।६
येन चाब्रह्म वालं तृणं धार्यते सृज्यते पाल्यते सर्वमेतज्जगत्।
भक्तभावप्रियं श्रीदयासागरं सत्यनारायणं विष्णुमीशम्भजे।।७
सर्वकामप्रदं सर्वदा सत्प्रियं वन्दितं देववृन्दैर्मुनीन्द्रार्चितम्।
पुत्रपौत्रादिसर्वेष्टदं शाश्वतं सत्यनारायणं विष्णुमीशम्भजे।।८
अष्टकं सत्यदेवस्य भक्त्या नरः भावयुक्तो मुदा यस्त्रिसन्ध्यं पठेत्।
तस्य नश्यन्ति पापानि तेनाग्निना इन्धनानीव शुष्काणिसर्वाणिवै।।९

*श्रीसत्यनारायणाष्टकं सम्पूर्णम्।*

## श्रीमहालक्ष्म्यष्टक

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते।।१।।
नमस्ते गरुडारूढे कोलासुर भयङ्करि।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते।।२।।
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते।।३।।
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनी।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते।।४।।
आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते।।५।।
स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते।।६।।
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते।।७।।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



श्वेताम्बरधरे देवि नानालङ्कारभूषिते।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥८॥
महालक्ष्म्यष्टकस्तोत्रं यः पठेद् भक्तिमान्नरः।
सर्वसिद्धिमवाप्नोति राज्यमाप्नोति सर्वदा॥९॥
एककालं पठेन्नित्यं महापापविनाशनम्।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितम्॥१०॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा॥११॥

*इन्द्रकृतं श्रीमहालक्ष्म्यष्टकस्तोत्रं सम्पूर्णम्।*

## कनकधारा-स्तोत्र

अङ्गं हरेः पुलकभूषणमाश्रयन्ती भृङ्गाङ्गनेव मुकुलाभरणं तमालम्। अङ्गीकृताखिलविभूतिरपाङ्गलीला माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥१॥ मुग्धा मुहुर्विदधती वदने मुरारेः प्रेमत्रपाप्रणिहितानि गतागतानि। मालादृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसम्भवायाः ॥२॥ विश्वामरेन्द्रपदविभ्रमदानदक्षमानन्दहेतुरधिकं मुरविद्विषोऽपि। ईषन्निषीदतु मयि क्षणमीक्षणार्धमिन्दीवरोदरसहोदरमिन्दिरायाः ॥३॥ आमीलिताक्षमधिगम्य मुदा मुकुन्दमानन्दकन्दमनिमेषमनङ्गतन्त्रम्। आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥४॥ बाह्वन्तरे मधुजितः श्रितकौस्तुभे या हारावलीव हरिनीलमयी विभाति। कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतु मे कमलालयायाः ॥५॥ कालाम्बुदालिललितोरसि कैटभारेर्धाराधरे स्फुरति या तडिदंगनेव। मातुः समस्तजगतां नमनीयमूर्तिर्भद्राणि मे दिशतु भार्गवनन्दनायाः ॥६॥ प्राप्तं पदं प्रथमतः किल यत् प्रभावान् माङ्गल्यभाजि मधुमाथिनि मन्मथेन। मय्यापतेत्तदिह मन्थरमीक्षणार्धं मन्दालसं च मकरालयकन्यकायाः ॥७॥ दद्याद्दयानुपवनो द्रविणाम्बुधारामस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे। दुष्कर्मधर्ममपनीय चिराय दूरं नारायणप्रणयिनीनयनाम्बुवाहः ॥८॥ इष्टातिशिष्टमतयोऽपि यया दयार्द्रदृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते। दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः॥९॥ गीर्देवतेति

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



गरुडध्वजभामिनीति शाकम्भरीति शशिशेखरवल्लभेति। सृष्टिस्थिति-प्रलयकेलिषु संस्थितायै तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥१०॥ श्रुत्यै नमो स्तु शुभकर्मफलप्रसूत्यै रत्यै नमोऽस्तु रमणीयगुणार्णवायै। शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोऽस्तु पुरुषोत्तम-वल्लभायै ॥११॥ नमोऽस्तु नालीकनिभाननायै नमोऽस्तु दुग्धोदधि-जन्मभूत्यै। नमोऽस्तु सोमामृतसोदरायै नमोऽस्तु नारायणवल्लभायै ॥१२॥ सम्पत्कराणि सकलेन्द्रियनन्दनानि साम्राज्यदानविभवानि सरोरुहाक्षि। त्वद्वन्दनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयन्तु मान्ये ॥१३॥ यत्कटाक्षसमुपासनाविधिः सेवकस्य सकलार्थसम्पदः। सन्तनोति वचनाङ्गमानसैस्त्वां मुरारिहृदयेश्वरीं भजे ॥१४॥ सरसिजनिलये सरोजहस्ते धवलतमांशुकगन्धमाल्य-शोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरी प्रसीद मह्यम् ॥१५॥ दिग्घस्तिभिः कनककुम्भमुखावसृष्टस्वर्वाहिनीविमलचारु-जलप्लुताङ्गीम्। प्रातर्नमामि जगतां जननीमशेषलोकाधिराज-गृहिणीममृताब्धिपुत्रीम् ॥१६॥ कमले कमलाक्षवल्लभे त्वं करुणापूर-तरङ्गितैरपाङ्गैः। अवलोकय मामकिञ्चनानां प्रथमं पात्रमकृत्रिमं दयायाः॥१७॥ स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवन-मातरं रमाम्। गुणाधिका गुरुतरभाग्यभागिनो भवन्ति ते भुवि बुधभाविताशयाः ॥१८॥

*श्रीभगवत्पादशंकर-विरचितं कनकधारास्तोत्रं सम्पूर्णम् ॥*

## श्रीकृष्णयजुर्वेदीय चाक्षुषोपनिषद

विनियोग ॐ अस्याश्चाक्षुषीविद्याया अहिर्बुध्न्य ऋषिर्गायत्री छन्दः सूर्यो देवता चक्षूरोगनिवृत्तये विनियोगः।

ॐ चक्षुः चक्षुः चक्षुः तेजः स्थिरो भव। मां पाहि पाहि। त्वरितं चक्षूरोगान् शमय शमय। मम जातरूपं तेजो दर्शय दर्शय। यथा अहम् अन्धो न स्यां तथा कल्पय कल्पय। कल्याणं कुरु कुरु। यानि मम पूर्वजन्मोपार्जितानि चक्षुःप्रतिरोधकदुष्कृतानि तानि सर्वाणि निर्मूलय निर्मूलय॥

ॐ नमः चक्षुस्तेजोदात्रे दिव्याय भास्कराय। ॐ नमः करुणा-करायामृताय। ॐ नमः सूर्याय। ॐ नमो भगवते सूर्यायाक्षितेजसे

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



नमः। खेचराय नमः। महते नमः। रजसे नमः। तमसे नमः। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। उष्णो भगवाञ्छुचिरूपः। हंसो भगवान् शुचिरप्रतिरूपः। ॐ नमो भगवते आदित्याय अहोवाहिनी स्वाहा। ॐ विश्वरूपं घृणिं तं जातवेदसं, हिरण्मयं पुरुषं ज्योतीरूपं तपन्तम्। विश्वस्य योनिं प्रतपन्तम्। महान्तं पुरः प्रजानामुदयत्येष सूर्यः॥ य इमां चाक्षुष्मतीविद्यां द्विजो नित्यमधीते न तस्याक्षिरोगो भवति। न तस्य कुले अन्धो भवति। अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा विद्यासिद्धिर्भवति ॥

*श्रीकृष्णयजुर्वेदीया चाक्षुषोपनिषद् सम्पूर्णा॥*

इस चाक्षुषीविद्या का पाठ करने से नेत्रों के रोग दूर होते हैं एवं नेत्रों की ज्योति स्थिर रहती है। इसका पाठ नित्य करने वाले कुल में कोई अंधा नही होता। पाठके अन्त में गन्धादियुक्त जल से सूर्य को अर्घ देना चाहिये।

### श्रीगंगाष्टक

मातः शैलसुतासपत्नि वसुधाशृङ्गारहारावलि
स्वर्गारोहणवैजयन्ति भवतीं भागीरथि प्रार्थये।
त्वत्तीरे वसतस्त्वमम्बु पिबतस्त्वद्वीचिषु प्रेङ्खत-
स्त्वन्नामस्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः॥ १
त्वत्तीरे तरुकोटरान्तर्गतो गङ्गे विहङ्गो वरं
त्वन्नीरे नरकान्तकारिणि वरं मत्स्योऽथवा कच्छपः।
नैवान्यत्र मदान्धसिन्धुरघटासङ्घट्टघण्टारण-
त्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥ २
उक्षा पक्षी तुरग उरगः कोऽपि वा वारणो वाऽ-
वारीणः स्यां जननमरणक्लेशदुःखासहिष्णुः।
न त्वन्यत्र प्रविरलरणत्कङ्कणक्वाणमिश्रं
वारस्त्रीभिश्चमरमरुता वीजितो भूमिपालः॥ ३
काकैर्निष्कुषितं श्वभिः कवलितं गोमायुभिर्लुण्ठितं
स्त्रोतोभिश्चलितं तटाम्बुलुलितं वीचीभिरान्दोलितम्।
दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानः कदा
द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागीरथि स्वं वपुः॥ ४

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



अभिनवबिसवल्ली पादपद्मस्य विष्णो-
र्मदनमथनमौलेर्मालतीपुष्पमाला ।
जयति जयपताका काप्यसौ मोक्षलक्ष्म्याः
क्षपितकलिकलङ्का जाह्नवी नः पुनातु।।
एतत्तालतमालसालसरलव्यालोलवल्लीलता-
च्छन्नं सूर्यकरप्रतापरहितं शङ्खेन्दुकुन्दोज्ज्वलम्।
गन्धर्वामरसिद्धकिन्नरवधूतुङ्गस्तनास्फालितं
स्नानाय प्रतिवासरं भवतु मे गाङ्गं जलं निर्मलम्।। ६
गाङ्गं वारि मनोहारि मुरारिचरणच्युतम्।
त्रिपुरारिशिरश्चारि पापहारि पुनातु माम्।। ७
पापापहारि दुरितारि तरङ्गधारि
शैलप्रचारि गिरिराजगुहाविदारि।
झङ्कारकारि हरिपादरजोऽपहारि
गाङ्गं पुनातु सततं शुभकारि वारि।। ८
गंङ्गाष्टकं पठति यः प्रयतः प्रभाते
वाल्मीकिना विरचितं शुभदं मनुष्यः।
प्रक्षाल्य गात्रकलिकल्मषपङ्कमाशु
मोक्षं लभेत्पतति नैव नरो भवाब्धौ।।९

*श्रीवाल्मीकिविरचितं गङ्गाष्टकं सम्पूर्णम्।।*

## श्रीराधाकृष्णयुगलस्तोत्र

अनादिमाद्यं पुरुषोत्तमोत्तमं श्रीकृष्णचन्द्रं निजभक्तवत्सलम्।
स्वयं त्वसङ्ख्याण्डपतिं परात्परं राधापतिं त्वां शरणं ब्रजाम्यहम्।।१
गोलोकनाथस्त्वमतीवलीलो लीलावतीयं निजलोकलीला।
वैकुण्ठनाथोऽसि यदा त्वमेव लक्ष्मीस्तदेयं बृषभानुजा हि।।२
त्वं रामचन्द्रो जनकात्मजेयं भूमौ हरिस्त्वं कमलालयेयम्।
यज्ञावतारोऽसि यदा तदेयं श्रीदक्षिणास्त्रीप्रतिपत्निमुख्याः।।३
त्वं नारसिंहोऽसि रमा हृदीयं नारायणस्त्वं च नरेण युक्तः।
तदा त्वियं शान्तिरतीव साक्षाच्छायेव याता च तवानुरूपा।।४
त्वं ब्रह्म चेयं प्रकृतिस्तटस्था कालो यदेमां च विदुःप्रधानम्।
महान्यदा त्वं जगदङ्कुरोऽसि राधा तदेयं सगुणा च माया।।५

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



यदान्तरात्मा विदितश्चतुर्भिस्तदा त्वियं लक्षणरूपवृत्तिः।
यदा विराड्देहधरस्त्वमेव तदाखिलं वा भुवि धारणेयम्॥६
श्यामं च गौरं विदितं द्विधा महस्तवैव साक्षात्पुरुषोत्तमोत्तमम्।
गोलोकधामाधिपतिं परेशं परात्परं त्वां शरणं ब्रजाम्यहम्॥७
सदा पठेद्यो युगलस्तवं परं गोलोकधामं परमं प्रयाति सः।
इहैव सौन्दर्यसमृद्धिसिद्धयो भवन्ति तस्यापि निसर्गतः पुनः॥८

*श्रीगर्गसंहिताया ब्रह्मविरचितं श्रीराधा-कृष्ण-युगल-स्तोत्रं सम्पूर्णम्।*

## देव्यपराधक्षमापन-स्तोत्र

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्तदनुशरणं क्लेशहरणम्॥१
विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत्।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥२
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः।
मदीदोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥३
जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥४
परित्यक्ता देवान् विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम्॥५
श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥६
चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७
न मोक्षस्याकांङक्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८
नाराधितासि विधिना विविधोपचारैः
किं रूक्षचिन्तनपरैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥९
आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०
जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥११
मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥१२

*देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम्।*

## श्रीशीतलाष्टकम्

विनियोग ॐ अस्य श्रीशीतलास्तोत्रस्य महादेवऋषिः अनुष्टुप्छन्दः शीतलादेवता लक्ष्मीर्बीजं भवानिः शक्तिः सर्वविस्फोटकनिवृत्तये जपे विनियोगः।

वन्देऽहं शीतलां देवीं, रासभस्थां दिगम्बराम्।
मार्जनीकलशोपेतां, शूर्पालङ्कृतमस्तकाम् ॥१॥
वन्देऽहं शीतलां देवीं, सर्वरोगभयापहाम्।
यामासाद्य निवर्त्तेत, विस्फोटकभयं महत् ॥२॥
शीतले शीतले चेति, यो ब्रूयाद्दाहपीडितः।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



विस्फोटकभयं घोरं, क्षिप्रं तस्य प्रणश्यति ॥३॥
यस्त्वामुदकमध्ये तु, धृत्वा पूजयते नरः।
विस्फोटकभयं घोरं, गृहे तस्य न जायते ॥४॥
शीतले ज्वरदग्धस्य, पूतिगन्धयुतस्य च।
प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥५॥
शीतले तनुजान् रोगान्नृणां हरसि दुस्त्यजान्।
विस्फोटकविशीर्णानां, त्वमेकाऽमृतवर्षिणी ॥६॥
गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम्।
त्वदनुध्यानमात्रेण, शीतले यान्ति संक्षयम् ॥७॥
न मन्त्रो नौषधं तस्य, पाप-रोगस्य विद्यते।
त्वामेकां शीतले धात्रीं, नान्यां पश्यामि देवताम् ॥८॥
मृणालतन्तु सदृशीं, नाभिहृन्मध्यसंस्थिताम्।
यस्त्वां सञ्चिन्तयेद्देवि, तस्य मृत्युर्न जायते ॥९॥
अष्टकं शीतलादेव्या, यो नरः प्रपठेत्सदा।
विस्फोटकभयं घोरं, गृहे तस्य न जायते ॥१०॥
श्रोतव्यं पठितव्यं च, श्रद्धाभक्तिसमन्वितैः।
उपसर्गविनाशाय, परं स्वस्त्ययनं महत् ॥११॥
शीतले त्वं जगन्माता, शीतले त्वं जगत्पिता।
शीतले त्वं जगद्धात्री, शीतलायै नमो नमः ॥१२॥
रासभो गर्धवश्चैव, खरो वैशाखनन्दनः।
शीतला-वाहनश्चैव, दूर्वाकन्दनिकृन्तनः ॥१३॥
एतानि खरनामानि शीतलाग्रे तु यः पठेत्।
तस्य गेहे शिशूनां च शीतला-रुङ् न जायते ॥१४॥
शीतलाष्टकमेवेदं, न देयं तस्य कस्यचित्।
दातव्यं च सदा तस्मै, श्रद्धाभक्तियुताय वै ॥१५॥

*श्रीस्कन्दपुराणोक्तं शीतलाष्टकस्तोत्रं सम्पूर्णम्।*

## श्रीविष्णुसहस्रनाम स्तोत्रम्

*श्रीगणेशाय नमः॥ श्रीसत्यनारायणाय नमः॥ अथ मंगलाचरणम्॥*

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥१॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥२॥ व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्। पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥३॥ व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे। नमो वै ब्रह्मविधये वसिष्ठाय नमो नमः ॥४॥ अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः। अभाललोचनः शम्भुर्भगवान् बादरायणः ॥५॥

*अथ विष्णुसहस्रनामप्रारम्भः॥* ॐ श्रीपरमात्मने नमः॥ यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्। विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे॥१॥ नमः समस्तभूतानामादिभूताय भूभृते। अनेकरूप-रूपाय विष्णवे प्रभविष्णवे॥२॥ वैशम्पायन उवाच॥ श्रुत्वा धर्मान-शेषेण पावनानि च सर्वशः। युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥३॥ युधिष्ठिर उवाच॥ किमेकं दैवतं लोके किं वाप्येकं परायणम्। स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्॥४॥ को धर्मः सर्वधर्माणां भवतः परमो मतः। किं जपन् मुच्यते जन्तुर्जन्मसंसार-बन्धनात्॥५॥ भीष्म उवाच॥ जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्। स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः॥६॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्। ध्यायन् स्तुवन् नमस्यँश्च यजमानस्तमेव च॥७॥ अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्। लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्॥८॥ ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्। लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्॥९॥ एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः। यद् भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥१०॥ परमं यो महत्तेजः परमं यो महत्तपः। परमं यो महद्ब्रह्म परमं यः परायणम्॥११॥ पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्। दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥१२॥ यतः सर्वाणि भूतानि भवन्त्यादियुगागमे। यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥१३॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूपते। विष्णोर्नाम-सहस्रं मे शृणु पापभयापहम्॥१४॥ यानि नामानि गौणानि विख्यातानि महात्मनः। ऋषिभिः परिगीतानि तानि वक्ष्यामि भूपते॥१५॥ विष्णोर्नाम सहस्रस्य वेदव्यासो महामुनिः। छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः॥१६॥ विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्। अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम्॥ १७ ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



विनियोग ॐ अस्य श्रीविष्णोर्दिव्यसहस्त्रनामस्तोत्रमहामंन्त्रस्य भगवान् वेदव्यास ऋषिः अनुष्टुप्छन्दः श्रीकृष्णः परमात्मा श्रीमन्नारायणो देवता अमृताँशूद्भवो भानुरिति बीजम्, देवकीनन्दनः स्त्रष्टेति शक्तिः, त्रिसामा सामगः सामेति हृदयम्, शङ्खभृन्नन्दकी चक्रीति कीलकम्, शार्ङ्गधन्वा गदाधर इत्यस्त्रम्, रथाङ्गपाणिरक्षोभ्य इति कवचम्, उद्भवः क्षोभणो देव इति परमो मन्त्रः, श्रीकृष्णप्रीत्यर्थे सहस्त्रनामस्तोत्रजपे विनियोगः। अथ करन्यासः ॥ ॐ उद्भवाय अङ्गुष्ठाभ्यां नमः। ॐ क्षोभणाय तर्जनीभ्यां नमः। ॐ देवाय मध्यमाभ्यां नमः। ॐ उद्भवाय अनामिकाभ्यां नमः। ॐ क्षोभणाय कनिष्ठिकाभ्यां नमः। ॐ देवाय करतलकरपृष्ठाभ्यां नमः। इति करन्यासः॥ अथ हृदयादि षडङ्गन्यासः॥ ॐ सुव्रतः सुमुखः सूक्ष्मः ज्ञानाय हृदयाय नमः। ॐ सहस्त्रमूर्द्धा विश्वात्मा ऐश्वर्याय शिरसे स्वाहा। ॐ सहस्त्रार्चिः सप्त जिह्वः शक्त्यै शिखायै वषट्। ॐ त्रिसामा सामगः साम बलाय कवचाय हुम्। ॐ रथाङ्गपाणिरक्षोभ्यः तेजसे नेत्राभ्यां वौषट्। ॐ शार्ङ्गधन्वा गदाधरः वीर्याय अस्त्राय फट्॥ इति हृदयादि न्यासः। ऋतुः सुदर्शनः कालः भूर्भुवः स्वरोम्। इति दिग्बन्धः॥ अथ ध्यानम् ॥ ॐ क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकतैर्मौक्तिकानां मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः। शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैरानन्दी नः पुनीयादरिनलिन-गदाशङ्खपाणिर्मुकुन्दः॥१॥ भूः पादौ यस्य नाभिर्वियदसुरानिल-श्चन्द्रसूर्यौ च नेत्रे कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वासोऽयमब्धिः। अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्व दैत्यैश्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि॥२॥ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्। लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥३॥ मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम्। पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम्॥४॥ सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम्। सहारवक्षःस्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥५॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः। भूतकृद् भूतभृद् भावो भूतात्मा भूतभावनः॥१॥ पूतात्मा परमात्मा च मुक्तानां परमा गतिः। अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च॥२॥ योगो योगविदां नेता प्रधानपुरुषेश्वरः। नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः॥३॥ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः। सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः॥४॥ स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः। अनादिनिधनो धाता विधाता धातुरुत्तमः॥५॥ अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः। विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः॥६॥ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः। प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम्॥७॥ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः। हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥८॥ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः। अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥९॥ सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः। अहः सम्वत्सरो व्यालः प्रत्ययः सर्वदर्शनः॥१०॥ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः। वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः॥११॥ वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः। अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥१२॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः। अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः॥१३॥ सर्वगः सर्वविद् भानुर्विश्वक्सेनो जनार्दनः। वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः॥१४॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः। चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥१५॥ भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः। अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥१६॥ उपेन्द्रो वामनः प्रांशुरमोघः शुचिरुर्जितः। अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमो यमः॥१७॥ वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः। अतीन्द्रियो महामायो महोत्साहो महाबलः॥१८॥ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः। अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक्॥१९॥ महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः। अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः॥२०॥ मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः। हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः॥२१॥ अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः। अजो

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा॥२२॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः। निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः॥२३॥ अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः। सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥२४॥ आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः। अहः संवर्तको वह्निरनिलो धरणीधरः॥२५॥ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः। सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः॥२६॥ असङ्ख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः। सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः॥२७॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः। वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः॥२८॥ सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः। नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः॥२९॥ ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः। ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः॥३०॥ अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः। औषधं जगतः सेतुः सत्यधर्मपराक्रमः॥३१॥ भूतभव्यभवन्नाथः पवनः पावनोऽनलः। कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः॥३२॥ युगादिकृद्युगावर्तो नैकमायो महाशनः। अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित्॥३३॥ इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः। क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः॥३४॥ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः। अपान्निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः॥३५॥ स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः। वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः॥३६॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः। अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः॥३७॥ पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्। महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः॥३८॥ अतुलः शरभो भीमः समयज्ञो हविर्हरिः। सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः॥३९॥ विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः। महीधरो महाभागो वेगवानमिताशनः॥४०॥ उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः। करणं कारणं कर्ता विकर्ता गहनो गुहः॥४१॥ व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः। परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः सुभेक्षणः॥४२॥ रामो विरामो विरतो मार्गो नेयो नयोऽनयः। वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः॥४३॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः। हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः॥४४॥ ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः। उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः॥४५॥ विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम्। अर्थोऽनर्थो महाकोशो महाभोगो महाधनः॥४६॥ अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः। नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः॥४७॥ यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः। सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम्॥४८॥ सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्। मनोहरो जितक्रोधो वीरबाहुर्विदारणः॥४९॥ स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्। वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥५०॥ धर्मगुब् धर्मकृद् धर्मी सदसत्क्षरमक्षरम्। अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः॥५१॥ गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः। आदिदेवो महादेवो देवेशो देवभृद्गुरुः॥५२॥ उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः। शरीरभूतभृद् भोक्ता कपीन्द्रो भूरिदक्षिणः॥५३॥ सोमपोऽमृतपः सोमः पुरुजित् पुरुसत्तमः। विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः॥५४॥ जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः। अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः॥५५॥ अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः। आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः॥५६॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः। त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्॥५७॥ महावराहो गोविन्दः सुषेणः कनकाङ्गदी। गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥५८॥ वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः। वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः॥५९॥ भगवान् भगहानन्दी वनमाली हलायुधः। आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः॥६०॥ सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः। दिवःस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः॥६१॥ त्रिसामा सामगः सामः निर्वाणं भेषजं भिषक्। संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम्॥६२॥ शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः। गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥६३॥ अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः। श्रीवत्सवक्षाः श्रीवासः

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



श्रीपतिः श्रीमतां वरः॥६४॥ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः। श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः॥६५॥ स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः। विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः॥६६॥ उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः। भूशयो भूषणो भूतिर्विशोकः शोकनाशनः॥६७॥ अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः। अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः॥६८॥ कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः। त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः॥६९॥ कामदेवः कामपालः कामी कान्तः कृतागमः। अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः॥७०॥ ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविमर्दनः। ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः॥७१॥ महाक्रमो महाकर्मा महातेजा महोरगः। महाक्रतुर्महायज्वा महायज्ञो महाहविः॥७२॥ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः। पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः॥७३॥ मनोजवस्तीर्थकरो वसुरेता वसुप्रदः। वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥७३॥ सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः। शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः॥७५॥ भूतावासो वासुदेवः सर्वासुनिलयोऽनलः। दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः॥७६॥ विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्। अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः॥७७॥ एको नैकः सवः कः किं यत् तत् पदमनुत्तमम्। लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः॥७८॥ सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी। वीरहा विषमः शून्यो घृताशीरचलश्चलः॥७९॥ अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्। सुमेधा मेधजो धन्यः सत्यमेधा धराधरः॥८०॥ तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां बरः। प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः॥८१॥ चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः। चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥८२॥ समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः। दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥८३॥ शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः। इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः॥८४॥ उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः। अर्को वाजसनः शृङ्गी

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



जयन्तः सर्वविज्जयी॥८५॥ सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः। महाह्रदो महागर्त्तो महाभूतो महानिधिः॥८६॥ कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः। अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥८७॥ सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः। न्यग्रोधोऽदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः॥८८॥ सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः। अमूर्तिरनघोऽचिन्त्यो भयकृद् भयनाशनः॥८९॥ अणुर्बृहत्कृशः स्थूलो गुणभिन्निर्गुणो महान्। अधृतः स्वधृतः स्वास्यः प्रग्वंशो वंशवर्धनः॥९०॥ भारभृत् कथितो योगी योगीशः सर्वकामदः। आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः॥९१॥ धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः। अपराजितः सर्वसहो नियन्ता नियमो यमः॥९२॥ सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः। अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः॥९३॥ विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग् विभुः। रविर्विरोचनः सूर्यः सविता रविलोचनः॥९४॥ अनन्तो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः। अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः॥९५॥ सनात् सनातनतमः कपिलः कपिरव्ययः। स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः॥९६॥ अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः। शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः॥९७॥ अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः। विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः॥९८॥ उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः। वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः॥९९॥ अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः। चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः॥१००॥ अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः। जननो जनजन्मादिर्भीमो भीमपराक्रमः॥१०१॥ आधारनिलयोऽधाता पुष्पहासः प्रजागरः। ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः प्रणः॥१०२॥ प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः। तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः॥१०३॥ भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः। यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः॥१०४॥ यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः। यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च॥१०५॥ आत्मयोनिः स्वयं जातो वैखानः सामगायनः। देवकीनन्दनः स्रष्टा

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



क्षितीशः पापनाशनः॥१०६॥ शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः। रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥१०७॥ सर्वप्रहरणायुध ॐ नम इति॥ इतीदं कीर्तनीयस्य केशवस्य महात्मनः। नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम्॥१०८॥ य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्। नाशुभं प्राप्नुयात्किञ्चित् सोऽमुत्रेह च मानवः॥१०९॥ वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्। वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्॥११०॥ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्। कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम्॥१११॥ भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः। सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत्॥११२॥ यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च। अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यमुत्तमम्॥११३॥ न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति। भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः॥११४॥ रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्। भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः॥११५॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम्। स्तुवन्नाम-सहस्रेण नित्यं भक्तिसमन्वितः॥११६॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः। सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्॥११७॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित्। जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥११८॥ इदं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः। युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः॥११९॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे॥१२०॥ द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः। वासुदेवस्य वीर्येण विधृतानि महात्मनः॥१२१॥ ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्। जगद् वशे वर्ततेदं कृष्णस्य सचराचरम्॥१२२॥ इन्द्रियाणि मनोबुद्धिः सत्त्वं तेजो बलं धृतिः। वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च॥१२३॥ सर्वागमानामाचारः प्रथमं परिकल्पते। आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः॥१२४॥ ऋषयः पितरो देवाः महाभूतानि धातवः। जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥१२५॥ योगो ज्ञानं तथा साङ्ख्यं विद्या शिल्पादि कर्म च। वेदाः शास्त्राणि विज्ञानमेतत् सर्वं जनार्दनम्॥१२६॥ एको विष्णुर्महद्भूतं

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



पृथग्भूतान्यनेकशः। त्रीँल्लोकान् व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥१२७॥ इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्। पठेद् य इच्छेत् पुरुषः श्रेयः प्राप्तु सुखानि च॥१२८॥ विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम्। भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम्॥१२९॥ अर्जुन उवाच॥ पद्मपत्र विशालाक्ष पद्मनाभ सुरोत्तम। भक्तानामनुरक्तानां त्राता भवजनार्दन ।१३०॥ श्रीभगवानुवाच। ।यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव। सोहमेकेन श्लोकेन स्तुत एव न संशयः॥१३१॥ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे। सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥१३२॥ नमः कमलनाभाय नमस्ते जलशायिने। नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते॥१३३॥ वासनाद्वासुदेवस्य वासितं भुवनत्रयम्। सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते॥१३४॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च। जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥१३५॥ आकाशात्पतितं तोयं यथा गच्छति सागरम्। सर्वदेवनमस्कारः केशवं प्रतिगच्छति॥१३६॥ एष निष्कण्टकः पन्थाः यत्र सम्पूज्यते हरिः। कुपथं तं विजानीयात् गोविन्दरहितागमम्॥१३७॥ सर्वदेवेषु यत्पुण्यं सर्वतीर्थेषु यत् फलम्। तत् फलं समवाप्नोति स्तुत्वा देवं जनार्दनम्॥१३८॥ यो नरः पठते नित्यं त्रिकालं केशवालये। द्विकालमेककालं वा क्रूरं सर्वं व्यपोहति॥१३९॥ दह्यन्ते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः। विलीयन्ते च पापानि स्तवे ह्यस्मिन् प्रकीर्तिते॥१४०॥ येन ध्यातः श्रुतो येन येनायं पठितः स्तवः। दत्तानि सर्वदानानि सुराः सर्वे समर्चिताः॥१४१॥ इह लोके परे वाऽपि न भयं विद्यते क्वचित्। नाम्ना सहस्रं योऽधीते द्वादश्यां मम सन्निधौ॥१४२॥ स निर्दहति पापानि कल्पकोटिशतानि च। अश्वत्थसन्निधौ पार्थ तुलसीसन्निधौ तथा॥१४३॥ पठेन्नामसहस्रन्तु गवां कोटिफलं लभेत्। देवालये पठेन्नित्यं तुलसीवनसंस्थि ॥१४४॥ नरो मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा। ब्रह्महत्यादि घोरं सर्वं पापं विनश्यति॥१४५॥

*श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्याम् आनुशासनिके पर्वणि दानधर्मे भीष्मयुधिष्ठिरसंवादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं सम्पूर्णम् ।।*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



## श्रीशिवमहिम्नस्तोत्रम्

श्रीगणेशाय नमः।। पुष्पदन्त उवाच ॥ महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः। अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः।।१।। अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि। स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः।।२।। मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम्। मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ।।३।। तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् त्रयीवस्तुव्यस्तं तिषृषु गुणाभिन्नासु तनुषु। अभव्यानामस्मिन् वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः।।४।। किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च। अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं काँश्चिन् मुखरयति मोहाय जगतः।।५।। अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति। अनीशो वा कुर्याद् भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ।।६।। त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च। रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।७।। महोक्षः षट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम्। सुरास्तां तामृद्धिं विदधति भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति।।८।। ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये। समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता।।९।। तवैश्वर्यं यत्नाद् यदुपरि विरञ्चो हरिरधः परिच्छेतुं यातावनलमन स्कन्धवपुषः। ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति।।१०।। अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद् बाहूनभृत रणकण्डूपरवशान्।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम्॥११॥ अमुष्य त्वत्सेवा समधिगतसारं भुजवनं बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः। अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः॥१२॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः। न तच्चित्रं तस्मिन् परिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥१३॥ अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनयनविषं संहृतवतः। स कल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः॥१४॥ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः। स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥१५॥ मही पादाघाताद् व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्। मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥१६॥ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते। जगद् द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः॥१७॥ रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति। दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥१८॥ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्। गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्॥१९॥ क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते। अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः॥२०॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः। क्रतुभ्रेशस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः॥२१॥ प्रजानाथं नाथः प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषु मृष्यस्य वपुषा।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः॥२२॥ स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत् पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि। यदि स्त्रैणं देवी यमनिरत देहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः॥२३॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्त्रगपि नृकरोटीपरिकरः। अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥२४॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः। यदालोक्याह्लादं हृद इव निमज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान्॥२५॥ त्वकर्मस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च। परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति। तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम्॥२७॥ भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम्। अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते॥२८॥ नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः। नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः॥२९॥ बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः। जनसुखकृते सत्त्वोदृक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥३०॥ कृशपरिणति चेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः। इति चकितममन्दीकृत्य मां भक्तिराधाद् वरद चरणयोस्ते वाक्यपुष्पोपहारम्॥३१॥ असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी। लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति॥३२॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य। सकलगणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



॥३३॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत् पठति परमभक्त्या शुद्धचित्तः पुमान् यः। स भवति शिवलोके रुद्रतुल्यस्तथात्र प्रचुरतर-धनायुः पुत्रवान् कीर्तिमाँश्च॥३४॥ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः। अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः पदम्॥३५॥ दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः। महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम्॥३६॥ कुसुमदशननामा सर्वगन्धर्वराजः शिशु-शशिधरमौलेर्देवदेवस्य दासः। स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात् स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः॥३७॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः। व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥३८॥ श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्विषहरेण हरप्रियेण। कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः॥३९॥ इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः। अर्पिता तेन मे देव प्रीयतां च सदाशिवः॥ ४०॥

*श्रीपुष्पदन्त-गन्धर्वराज-विरचितं श्रीशिवमहिम्नस्तोत्रं सम्पूर्णम् ॥*

## श्रीशिव-मानस-पूजा-स्तोत्रम्

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम्।
जातीचम्पकबिल्वपत्रसहितं पुष्पं च धूपं तथा
दीपं देवदयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम्।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा।
साष्टाङ्ग प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४॥
करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम्।
विहितमविहितं वा सर्वमेतत्क्षमस्व,
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥५॥

*श्रीमच्छङ्कराचार्यविरचितं श्रीशिवमानसपूजास्तोत्रं सम्पूर्णम् ॥*

## श्रीशिवरामाष्टकम्

शिव हरे शिव राम सखे प्रभो त्रिविध ताप निवारण हे विभो।
अज जनेश्वर यादव पाहि मां शिवहरे विजयं कुरु मे वरम्॥ १
कमललोचन राम दयानिधे हरगुरो गजरक्षक गोपते।
शिवतनो भव शङ्कर पाहि मां शिवहरे विजयं कुरु मे वरम्॥ २
स्वजनरंजनमङ्गलमन्दिरं भजति तं पुरुषः परमं पदम्।
भवति तस्य सुखं परमाद्भुतं शिवहरे विजयं कुरु मे वरम्॥ ३
जय युधिष्ठिरवल्लभ भूपते जय जयार्जितपुण्यपयोनिधे।
जय कृपामय कृष्ण नमोऽस्तु ते शिवहरे विजयं कुरु मे वरम्॥ ४
भवविमोचन माधव मापते सुकविमानसहंस शिवारते।
जनकजारत राघव रक्ष मां शिवहरे विजयं कुरु मे वरम्॥ ५
अवनिमण्डलमङ्गल मापते जलद सुन्दर राम रमापते।
निगमकीर्तिगुणार्णव गोपते शिवहरे विजयं कुरुमे वरम्॥ ६
पतितपावननाममयी लता तव यशो विमलं परिगीयते।
तदपि माधव मां किमुपेक्षसे शिवहरे विजयं कुरु मे वरम्॥ ७
अमरता परदेव रमापते विजयतस्तव नाम धनोपमा।
मयि कथं करुणार्णव जायते शिवहरे विजयं कुरु मे वरम्॥ ८
हनुमतः प्रियतोषकर प्रभो सुरसरिद्धृतशेखर हे गुरो।
मम विभो किमु विस्मरणं कृतं शिवहरे विजयं कुरु मे वरम्॥ ९
नरहरे रतिरंजन सुन्दरं पठति यः शिवराम-कृतस्तवम्।
वसति रामरमाचरणाम्बुजे शिवहरे विजयं कुरु मे वरम्॥ १०

*श्रीरामानन्दयति-विरचितं शिवरामस्तोत्रं सम्पूर्णम् ॥*

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



# श्री आदित्यहृदयस्तोत्रम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्। रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्॥१॥ देवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्। उपागम्य ब्रवीद्राममगस्त्यो भगवाँस्तदा॥२॥ राम राम महाबाहो शृणु गुह्यं सनातनम्। येन सर्वानरीन् वत्स समरे विजयिष्यसे॥३॥ आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्। जपावहं जपन्नित्यमक्षयं परमं शिवम्॥४॥ सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्। चिन्ताशोक-प्रशमनमायुर्वर्धनमुत्तमम्॥५॥ रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्। पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥६॥ सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः। एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः ॥७॥ एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः। महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः॥८॥ पितरो वसवः साध्या अश्विनौ मरुतो मनुः। वायुर्वह्निः प्रजाः प्राणः ऋतुकर्ता प्रभाकरः॥९॥ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्। सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः॥१०॥ हरिदश्वः सहस्रार्चिः सप्तसप्ति-र्मरीचिमान्। तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान्॥११॥ हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः। अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः॥१२॥ व्योमनाथस्तमोभेदी ऋग्यजुः सामपारगः। धनवृष्टिरपां मित्रो विन्ध्यवीथिप्लवङ्गमः॥१३॥ आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः। कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥१४॥ नक्षत्रग्रहताराणा- मधिपो विश्वभावनः। तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तुते ॥५॥ नमः पूर्वाय गिरये पश्चिमायाद्रये नमः। ज्योतिर्गणानां पतये दिनाधिपतये नमः॥१६॥ जयाय जयभद्राय हर्यश्वाय नमो नमः। नमो नमः सहस्रांशो आदित्याय नमो नमः॥१७॥ नम उग्राय वीराय सारङ्गाय नमो नमः। नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते॥१८॥ ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे। भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥१९॥ तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने। कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः॥२०॥ तप्तचामीकराभाय हरये विश्वकर्मणे। नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे॥२१॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



नाशयत्येष वै भूतं तमेव सृजति प्रभुः। पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥२२॥ एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः। एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्॥२३॥ देवाश्च क्रतवश्चैव क्रतूनां फलमेव च। यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः॥२४॥ एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च। कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव॥२५॥ पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्॥ एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि॥२६॥ अस्मिन् क्षणे महाबाहो रावणं त्वं जयिष्यसि। एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम्॥२७॥ एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा। धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥२८॥ आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्। त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥२९॥ रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत्। सर्वयत्नेन महता यतस्तस्य वधेऽभवत्॥३०॥ अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः। निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति॥ ३१॥

*वाल्मीकिरामायणोक्तं आदित्यहृदयं सम्पूर्णम् ॥*

## अन्नपूर्णास्तोत्रम्

तप्तस्वर्णनिभा शशाङ्कमुकुटा रत्नप्रभाभासुरा
नानावस्त्रविराजिता त्रिनयना भूमीरमाभ्यां युता।
दर्वीहाटकभाजनञ्च दधती रम्योच्चपीनस्तनी
नृत्यन्तं शिवमाकलय्य मुदिता ध्येयाऽन्नपूर्णेश्वरी ॥

ॐ नमः कल्याणदे देवि नमः शङ्करवल्लभे।
नमो मुक्तिप्रदे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥१॥
नमो मायागृहीताङ्गी नमः शङ्करवल्लभे।
माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते ॥२॥
अन्नपूर्णे हव्यवाहपत्नीरूपे हरप्रिये।
कलाकाष्ठारवरूपे च अन्नपूर्णे नमोऽस्तु ते ॥३॥
उद्यद्भानुसहस्राभे नयनत्रयभूषिते।
चन्द्रचूडे महादेवि अन्नपूर्णे नमोऽस्तु ते ॥४॥
विचित्रवसने देवि त्वन्नदानरतेऽनघे।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



शिवनृत्यकृतामोदे अन्नपूर्णे नमोऽस्तु ते ॥५॥
षट्कोणपद्ममध्यस्थे षडङ्गयुवतिप्रिये।
ब्रह्माण्यादिस्वरूपे च अन्नपूर्णे नमोऽस्तु ते ॥६॥
देवि चन्द्रकलापीठे सर्वसाम्राज्यदायिनि।
सर्वानन्दकरे देवि अन्नपूर्णे नमोऽस्तु ते ॥७॥
साधकाभीष्टदे देवि भवदुःखविनाशिनी।
कुचभारनते देवि अन्नपूर्णे नमोऽस्तु ते ॥८॥
इन्द्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणी।
सर्वसम्पत्प्रदे देवि अन्नपूर्णे नमोऽस्तु ते ॥९॥
पूजाकाले पठेद्यस्तु स्तोत्रमेतत्समाहितः।
तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥१०॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरःसरम्।
तस्यैवान्नसमृद्धिः स्यात् वर्धमाना दिने दिने ॥११॥

*श्री अन्नपूर्णास्तोत्रम् सम्पूर्णम् ॥*

## श्रीसूक्तम्

विनियोग ॐ अस्य श्रीहिरण्यवर्णामिति पञ्चदशर्चस्य श्रीसूक्तस्य श्री आनन्दकर्दमचिक्लीतेन्दिरासुता ऋषयः श्रीरग्निर्देवते आद्यत्रयस्या नुष्टुप्छन्दः कांसोऽस्मीति बृहती छन्दः चन्द्रां प्रभासामिति द्वयोस्त्रिष्टुप्छन्दः अन्त्यायाः प्रस्तारपंक्तिश्छन्दो व्यंजनानि बीजानि स्वराः शक्तयः विन्दुः कीलकं ममाभीष्टसिद्ध्यर्थे धन-धान्य-सकलसमृद्ध्यर्थे श्रीमहालक्ष्मीप्रीतिद्वारा चतुर्विधपुरुषार्थसम्पत्तये श्रीमहालक्ष्मीसूक्तमहामन्त्रजपे विनियोगः।

*अथ षडङ्गन्यासः ॥* ॐ हिरण्यायै अङ्गुष्ठाभ्यां नमः। ॐ चन्द्रायै तर्जनीभ्यां नमः। ॐ रजतस्रजायै मध्यमाभ्यां नमः। ॐ हिरण्य-स्रजायै अनामिकाभ्यां नमः। ॐ हिरण्यजायै कनिष्ठिकाभ्यां नमः। ॐ हिरण्यवर्णायै करतलकरपृष्ठाभ्यां नमः।। *एवं हृदयादिन्यासः।*

अथ ध्यानम् अरुणकमलसंस्था तद्रजः पुञ्जवर्णा
करयुगलधृतेष्टा-ऽभीतियुग्मांम्बुजा च।
मणिमयमुकुटाढ्याऽलङ्कृता कल्पजालै-
र्भवतु भुवनमाता सन्ततं श्रीः श्रीयै नः॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



ॐ लं पृथिव्यात्मकं गन्धं समर्पयामि। ॐ हं आकाशात्मकं पुष्पं समर्पयामि। ॐ यं वाय्वात्मकं धूपं समर्पयामि। ॐ रं अग्न्यात्मकं दीपं समर्पयामि। ॐ वं अमृतात्मकं अमृतनैवेद्यं समर्पयामि। (श्रीमहालक्ष्म्यै नमः द्वादशगुणितताम्बूलं समर्पयामि) ॐ सं सर्वात्मकं श्रीमहालक्ष्म्यै नमः सर्वराजोपचारान् समर्पयामि। *एवं पञ्चोपचारैः सम्पूज्य पाठान्तेऽपि षडङ्गन्यासं कुर्यात्॥ पाठान्ते च लक्ष्मीगायत्रीं (१०८) जपेत्।* ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात् ॥ *इति लक्ष्मीगायत्री मन्त्रः।*

ॐ हिरण्यवर्णां हिरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥१॥ तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥२॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्। श्रियं देविमुप ह्वये श्रीर्मा देवी जुषताम्॥३॥ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोप ह्वये श्रियम्॥४॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्। तां पद्मिनीमीं शरणं प्र पद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे॥५॥ आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्या अलक्ष्मीः॥६॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥७॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥८॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम्॥९॥ मनसः काममाकूतीं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥१०॥ कर्दमेन प्रजा भूता मयि सम्भव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥११॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले॥१२॥ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥१३॥ आर्द्रां यः करणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥१४॥ ता म आ वह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



दारयोऽश्वान् विन्देयं पुरुषानहम्॥१५॥ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६॥ पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि। विश्वप्रिये विष्णुमनो नुकूले त्वत्पादपद्मं पयि सं नि धत्स्व॥ पद्मानने पद्म ऊरू पद्माक्षि पद्मसम्भवे। तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम्॥१७॥ अश्वदायि गोदायि धनदायि महाधने। धनं मे जुषतां देवि सर्वकामाँश्च देहि मे॥१८॥ पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवे रथम्। प्रजानां भवसी माता आयुष्मन्तं करोतु मे॥१९॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः। धनमिन्द्रो बृहस्पतिर्वरुणो धनमश्विना॥२०॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा। सोमं धनस्य सोमीनो मह्यं ददातु सोमिनः॥२१॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्त्या श्रीसूक्तजापिनाम्।२२॥ सरसिजनिलये सरोजहस्ते धवलतरांशुक-गन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्र सीद मह्यम्॥२३॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं भूमिं नमाम्यच्युतवल्लभाम्॥२४॥ महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्र चोदयात्॥२५॥ पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि। विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं हृदि सन्निधत्स्व॥२६॥ आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः। ऋषयः श्रियः पुत्राश्च श्रीर्देवीर्देवता मताः ॥२७॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते। धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥२८॥ ऋणरोगादि दारिद्र्य पापक्षुदपमृत्यवः। भयशोकमनस्तापा नश्यन्तु मम सर्वदा॥२९॥

*ऋग्वेदोक्तं श्रीसूक्तं सम्पूर्णम् ॥*

## श्रीनवग्रहस्तोत्रम्

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥ १॥
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम्।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम्॥ २॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम्।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम्॥ ३॥
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्॥ ४॥
देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम्।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्॥ ५॥
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्॥ ६॥
नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम्।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम्॥ ७॥
अर्द्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्।
सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम्॥ ८॥
पलाशपुष्पसङ्काशं तारकाग्रहमस्तकम्।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्॥ ९॥
इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितम्।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति॥ १०॥
नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम्।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम्॥ ११॥

*महर्षिव्यासविरचितं नवग्रहस्तोत्रं सम्पूर्णम्॥*

## गजेन्द्रमोक्षस्तोत्रम्

श्रीशुकोवाच एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि।
जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम्॥ १

गजेन्द्रोवाच ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम्।
पुरुषायादिबीजाय परेशायाभिधीमहि॥ २
यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम्।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम्॥ ३
यः स्वात्मनीदं निजमाययार्पितं, क्वचिद्विभातं क्व च तत्तिरोहितम्।
अविद्धदृक् साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः॥ ४
कालेन पञ्चत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु।
तमस्तदाऽऽसीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः॥ ५

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम्।
यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु॥ ६
दिदृक्षवो यस्य पदं सुमङ्गलं विमुक्तसङ्गा मुनयः सुसाधवः।
चरन्त्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः॥ ७
न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा।
तथापि लोकाप्ययसम्भवाय यः स्वमायया तान्यनुकालमृच्छति॥८

तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये।
अरूपायोरुरूपाय नम आश्चर्यकर्मणे॥ ९
नम आत्मप्रदीपाय साक्षिणे परमात्मने।
नमो गिरां विदूराय मनसश्चेतसामपि॥ १०
सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता।
नमः कैवल्यनाथाय निर्वाणसुखसंविदे॥ ११
नमः शान्ताय घोराय मूढाय गुणधर्मिणे।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च॥ १२
क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे।
पुरुषायात्ममूलाय मूलप्रकृतये नमः॥ १३
सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे।
असताच्छाययोक्ताय सदाभासाय ते नमः॥ १४

नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय।
सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय॥१५
गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय।
नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि॥१६
मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय।
स्वांशेन सर्वतनुभृन्मनसि प्रतीत प्रत्यग्दृशे भगवते बृहते नमस्ते॥१७
आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसङ्गविवर्जिताय।
मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय॥१८
यं धर्मकामार्थविमुक्तिकामा भजन्त इष्टां गतिमाप्नुवन्ति।
किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम्॥१९
एकान्तिनो यस्य न कञ्चनार्थं वांछन्ति ये वै भगवत्प्रपन्नाः।
अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः॥२०

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम्।
अतीन्द्रियं सूक्ष्ममिवातिदूरमनन्तमाद्यं परिपूर्णमीडे॥२१

यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः।
नामरूपविभेदेन फल्ग्व्या च कलया कृताः॥ २२

यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत्स्वरोचिषः।
तथा यतोऽयं गुणसम्प्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः॥२३

स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान्न जन्तुः।
नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः॥२४

जिजीविषे नाहमिहामुया किमन्तर्बहिश्चावृतयेभयोन्या।
इच्छामि कालेन न यस्यविप्लवस्तस्यात्मलोकावरणस्य मोक्षम्॥२५

सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम्।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम्॥ २६

योगरन्धितकर्माणो हृदि योगविभावते।
योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम्॥ २७

नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाऽखिलधीगुणाय।
प्रपन्न-पालाय दुरन्त-शक्तये कदिन्द्रियाणामनवाप्य वर्त्मने॥२८

नायं वेद स्वमात्मानं यच्छक्त्याहं धिया हतम्।
तं दुरत्यय-माहात्म्यं भगवन्तमितोऽस्म्यहम्॥ २९

॥ श्रीशुक उवाच॥

एवं गजेन्द्रमुपवर्णितनिर्विशेषं
ब्रह्मादयो विविधलिङ्गभिदाभिमानाः।
नैते यदोपससृपुर्निखिलात्मकत्वात्
तत्राखिलामरमयो हरिराविरासीत्॥३०॥

तं तद्वदार्त्तमुपलभ्य जगन्निवासः
स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः।
छन्दोमयेन गरुडेन समुह्यमान-
श्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः॥३१॥

सोऽन्तः सरस्युरुबलेन गृहीत आर्त्तो
दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम्।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



उत्क्षिप्य साम्बुजकरं गिरिमाह कृच्छ्रा-
न्नारायणाखिलगुरो भगवन्नमस्ते॥३२॥
तं वीक्ष्य पीडितमजः सहसावतीर्य
सग्राहमाशु सरसः कृपयोज्जहार।
ग्राहाद्विपाटितमुखादरिणा गजेन्द्रं
सम्पश्यतां हरिरमूमुचदुस्त्रियाणाम्॥३३॥

*श्रीमद्भागवते अष्टमस्कन्धे गजेन्द्रमोक्षस्तोत्रं सम्पूर्णम्॥*

## श्रीमच्छंकराचार्यविरचिता दशश्लोकी

न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः।
अनैकान्तिकत्वात् सुषुप्तेकसिद्धस्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥
न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणाध्यानयोगादयोऽपि।
अनात्माश्रयाहं ममाध्यासहानात् तदेकोऽवशिष्टः शिवः केवलो॰॥
न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवन्ति।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात् तदेकोऽवशिष्टः शिवः केवलो॰॥
न साङ्ख्यं न शैवं न तत्पाञ्चरात्रं न जैनं न मीमांसकादेर्मतं वा।
विशिष्टानुभूत्या विशुद्धात्मकत्वात् तदेकोऽवशिष्टः शिवः केवलो॰॥
न चोर्ध्वं न चाधो न चान्तर्न बाह्यं न मध्यं न तिर्यङ् न पूर्वाऽपरा दिक्।
वियद्व्यापकत्वादखण्डैकरूपस्तदेकोऽवशिष्टः शिवः केवलो॰॥
न शुक्लं न कृष्णं न रक्तं न पीतं न कुब्जं न पीनं न ह्रस्वं न दीर्घम्।
अरूपं तथा ज्योतिराकारकत्वात् तदेकोऽवशिष्टः शिवः केवलो॰॥
न शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न चायं प्रपञ्चः।
स्वरूपावबोधो विकल्पासहिष्णुस्तदेकोऽवशिष्टः शिवः केवलो॰॥
न जाग्रन्न मे स्वप्नको वा सुषुप्तिर्न विश्वो न वा तैजसः प्राज्ञको वा।
अविद्यात्मकत्वात् त्रयाणां तुरीयस्तदेकोऽवशिष्टः शिवः केवलो॰॥
अपि व्यापकत्वाद्धितत्त्वप्रयोगात् स्वतस्सिद्धभावादनन्याश्रयत्वात्।
जगत्तुच्छमेतत् समस्तं तदन्यत् तदेकोऽवशिष्टः शिवः केवलो॰॥
